ॐ

नमः परमर्षिभ्यो योगिभ्यः

# प्रणववादार्थविमर्शः ।

तत्र

## प्रथमगुच्छः

नारायणः परं ब्रह्म सूत्रात्मा परमेश्वरः ।
शास्ता च सर्वधर्माणां शर्मणे जगतां भवेत् ॥

श्रीमन्महर्षिगार्ग्यायणप्रणीतप्रणवव्याख्यानपरप्रणववादशास्त्रस्य प्रथमभागस्य चोपोद्घातप्रबन्धे हि "प्रणववादप्रतिपादितार्थ एव पूर्वसमयाचार्याणां व्यासादिमहर्षीणां वेदपुरुषस्य चाभिमतो भवतीति प्रणववादविमर्शग्रन्थेऽस्माभिः सप्रमाणं निरूपितो भवति, स च साकं प्रणववादद्वितीयतृतीयभागाभ्यां मुद्रयित्वा प्रकटीक्रियते" इत्यस्माभिर्भवति किल विज्ञापितम् । ततो विषयं तु स्वविशुद्ध-बुध्या निष्पक्षपातं हि तोलयिषतां सारासारविवेकिनां च सज्जनानां प्रमोदाय, प्रणववादप्रतिपादितानां च विशेषार्थानां विमर्शश्च शास्त्रीयो यथाबुद्धिविभवं सविनयं चेत्थं निरूप्यते ।

प्रणववादप्रथमभागोपोद्घाते त्वस्मदीये, सर्वाभ्युदयसाधनत्वेन सर्वेषां विद्याध्ययनावश्यकत्वम्, परापरभेदेन विद्याद्वैविध्यम्, ऐक्येन तद्विद्याद्वयाध्ययनप्रकारः, प्रणवस्य परविद्यात्वेन ब्रह्मविद्यास्वरूपत्वम्, ब्रह्मविद्याध्ययनस्य मुख्यत्वम्, ब्रह्मस्वरूपस्वभावविज्ञानादेवाधिकारिणां परप्राप्तिश्चेत्यादि सर्वं भवति संग्रहेण प्रतिपादितम्। प्रणवस्य परविद्यात्वेन ब्रह्मविद्यास्वरूपत्वं चेत्थम्—

" शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपपन्नः पप्रच्छ।
कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति॥
तस्मै स होवाच, द्वे विद्ये वेदितव्ये इति ह स्म
यद्ब्रह्मविदो वदन्ति परा चैवाऽपरा च॥
तत्राऽपरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः
शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।
अथ परा यया तदक्षरमधिगम्यते॥

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः॥" इति मुण्डकश्रुतिप्रतिपादितं भवति।

---

## प्रणवमाहात्म्यम्।

इत्थं हि कठोपनिषदा प्रणवस्य—ब्रह्मवाचकत्वेन, ब्रह्मसामीप्यप्राप्तिकारणकर्मभक्तिज्ञानयोगसाधनत्वेन, पराऽपरब्रह्मालंबनभूतत्वेन, उपासकानां ब्रह्मकार्यप्रापकत्वेन च माहात्म्यमवगम्यते—



" सर्वे वेदा यत्पदमामनन्ति
तपांसि सर्वाणि च यद्वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्॥

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥
एतदालंबनं श्रेष्ठमेतदालंबनं परम्।
एतदालंबनं ज्ञात्वा ब्रह्मलोके महीयते॥"

इति। यच्च हि परं ब्रह्म शब्दाद्युपलक्षणानर्हं पुरुषाख्यम्, यच्चाऽपरं ब्रह्म सोपाधिकम्, तदुभयस्यापि समष्टिव्यष्टिस्वरूपप्रणवबोध्यत्वमित्थम्—

" एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः।
तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति॥"

इति प्रश्नोपनिषत्प्रतिपादितं भवति। एवं मुण्डकोपनिषदि च—

" प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्॥"

इति ब्रह्मस्वरूपविज्ञानसाधनत्वं प्रणवस्यास्तीत्यवगम्यते। एवम्—

" ओमित्येतदक्षरमिदं सर्वं तस्योपाख्यानं
भूतं भवद्भविष्यदिति सर्वमोङ्कार एव ।
यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव ॥ "

इति माण्डूक्यश्रुत्या प्रणवस्यात्मानात्मशरीरब्रह्मप्रतिमाभूतत्वम्, कालत्रयपरिच्छेद्यत्वमपरिच्छेद्यत्वं सर्ववस्तुबोधकत्वं चोक्तं भवति । एवमेव—" ओमिति ब्रह्म । ओमितीदं सर्वम् । इति तैत्तिरीय-श्रुत्या प्रणवस्य, प्रतिमेव विष्णोः ब्रह्मस्वरूपत्वं चोक्तं भवति । एवम् " यच्छन्दसामृषभो विश्वरूपः " इति तैत्तिरीयश्रुत्या " ओङ्कारः संप्रास्रवत्तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्येव-मोङ्कारेण सर्वावाक्संतृण्णोङ्कार एवेदं सर्वमोङ्कार एवेदं सर्वम् " इति छान्दोग्यश्रुत्या च सर्ववेदाद्यत्वान्यत्वम्, सर्ववाङ्मयबीजभूतत्वं च प्रणवस्य प्रतिपादितं भवति । एवम्—

" ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥

ओन्तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥

तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ "

इति श्रीभगवद्गीतावचनेन प्रणवस्य ब्रह्मबोधकत्वं ब्रह्मोपासना-साधनत्वं चोक्तं भवति । इत्थं हि महर्षिर्भगवान्गोभिलोऽपि—



" अवस्था ब्रह्मणो वेदा द्विविधेति वदन्त्यतः ।
एका त्वतीता कथिता तदवस्थोपलक्षितम् ॥

ब्रह्म स्तुतं नैव वेदैः साङ्गोपाङ्गैश्च सर्वशः ।
तन्नैव योगिभिर्ध्येयं न च तद्वाच्यमुच्यते ॥

तद्दिव्यदृष्टिभिर्ब्रह्म परमं नैव दृश्यते ।
किं तु सर्वस्वभावैश्च तदुपेतं परात्परम् ॥

अस्ति ब्रह्मेति सिद्धान्तः सद्भिरभ्युपगम्यते ।
अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः ॥

इति स्तौति श्रुतिश्चापि ह्यस्ति ब्रह्मेति वादिनम् ।
तस्माच्च वैदिकाः सर्वे ब्रह्मास्तीति वदन्ति हि ॥

तच्चैव परमं ब्रह्म केचिच्छून्यादिनामभिः ।
वर्णयन्ति न सन्तस्ते नास्तिकास्ते प्रकीर्तिताः ॥

तेऽपि स्युः शुद्धसिद्धान्ते ब्रह्मैकशरणा मताः ।
यतश्च तच्च नास्तिक्यमपि ब्रह्मस्वरूपदम् ॥

शून्यादि नामभावैश्च ततः स्युस्तेऽपि चास्तिकाः ।
ब्रह्मजिज्ञासवस्ते स्युर्येन केनापि नामभिः ॥

आस्तिक्यं चैव नास्तिक्यं भवेदेतादृशं पुनः ।
साधारणं च सर्वेषां यथादेशं यथामति ॥

अस्ति नास्तीति वाक्यार्थं ये न जानन्ति मानवाः ।
ते चैव नास्तिकाः प्रोक्ताः परमाश्च यथेच्छगाः ॥

कार्याकार्योऽविवेकात्ते पतन्तः सर्ववर्त्मनः ।
दुष्टस्वव्यवसायैश्च भ्रमन्त्येव न चान्यथा ॥

अवस्था त्वपरा याऽस्ति ब्रह्मणो हि स्वभावतः ।
तयोपेतं परं ब्रह्म सच्चिदानन्दविग्रहम् ॥

शान्तं सहस्रशीर्षं च सहस्राक्षं सहस्रपत् ।
सर्वं व्याप्य स्थितं शुद्धं पुरुषं चेति बुध्यते ॥

पञ्चभिः साधनैस्तच्च समुपास्यं विराजते ।
स्वरूपैर्नवभिश्चापि तदेव समुपास्यते ॥

पुरुषः परमात्माऽऽत्मा जीवश्चाक्षर इत्यपि ।
पञ्चभिर्नामभिश्चैव युक्तं तद्ब्रह्म भासते ॥

एषां ब्रह्मस्वरूपाणां स्याद्यथोत्तरमेव हि ।
स्वस्वरूपाभियुक्तश्च सङ्कोचोऽस्तीति निर्णयः ॥

शुद्धस्वभावसञ्जातो विकासो ब्रह्मणो भवेत् ।
यथाविकासं तद्ब्रह्म नाना नामभिरुच्यते ॥

तत्परप्रेप्सवश्चैव सर्वे चैवाधिकारिणः ।
यथारूपं यथाशास्त्रं ब्रह्मरूपमुपासते ॥



तेषां ब्रह्मस्वरूपाणामित्थं त्रैविध्यमुच्यते ।
प्रवृत्तं च निवृत्तं च शुद्धं चेति स्वभावतः ॥

तत्र ब्रह्मस्वरूपाणां त्रयाणां च निगद्यते ।
प्रवृत्ताद्यत्वमेवं च तुरीयस्य विशेषतः ॥

ब्रह्मणो हि स्वरूपस्य निवृत्ताद्यत्वमुच्यते ।
ब्रह्मणो यत्स्वरूपं तु पञ्चमं पौरुषं भवेत् ॥

तच्छुद्धमिति विज्ञेयं भारतार्थविशारदैः ।
सर्वाणि ब्रह्मरूपाणि पञ्च तानि महात्मभिः ॥

विषयत्वेन चोक्तानि भवन्तीति च निर्णयः ।
एवं प्रयोजनत्वेन साधनत्वेन च स्वतः ॥

तथा च ब्रह्मरूपं तु प्रवृत्तं विषयादिभिः ।
त्रिभिश्च त्रिविधं ज्ञेयं निवृत्तं चैवमेव तत् ॥

एवं शुद्धं च विज्ञेयं तस्माद्ब्रह्म सनातनम् ।
प्रकारैर्नवभिर्युक्तं चैकमेव विराजते ॥

अत्रापि बहुधा भेदः संभवेच्च गुणैस्त्रिभिः ।
ततो यथाधिकारं च ब्रह्म नानास्वरूपवत् ॥

तत्परप्राप्तये नित्यं विद्वद्भिः समुपास्यते ।
इति ब्रह्ममुखाद्यैश्च सिद्धैरभ्युपगम्यते ॥

पञ्चानां ब्रह्मरूपाणां यच्च पञ्चममुच्यते ।
पुरुषाख्यं शुद्धरूपं सर्वकारणकारणम् ॥

विषयाद्यास्त्रयो भेदास्तस्य न स्युरितीर्यते ।
शुद्धैः प्राचीनहंसैश्च तदिदं शुद्धसंमतम् ॥

नारदः पुरुषाख्यं च ब्रह्म यद्धि सनातनम् ।
शुद्धं तस्य तु नैवास्ति भेदश्च विषयादिभिः ॥

इत्थं तदत्र विज्ञेयं सूक्तं हि गणयोगिभिः ।
त्रिपदा त्रिगुणा या च मनोर्माता महीयसी ॥

षड्धर्मचरणा देवी सा स्यात्संसारतत्परा ।
चतुष्पदा च सा प्रोक्ता भवेद्योगपरेति च ॥

गायत्रीति च संज्ञा हि द्वयोरेकेति गीयते ।
तत्त्वार्थतत्परा देवी सा चतुश्चरणा भवेत् ॥

भावत्रयपरा या च सा भवेत्त्रिपदा मता ।
भावत्रयपराणां च त्रिपदा ब्रह्मसंमिता ॥

कर्तव्यव्यवसायस्य दात्री ज्ञानस्य च स्वतः ।
भवेदिति हि सिद्धान्तो गणयोगिभिरुच्यते ॥

योगान्तस्थानसंस्थानवाचकः प्रणवो भवेत् ।
चतुष्पदा च गायत्री तदर्थान्वक्ति निश्चयात् ॥



व्यवसायाधिनाथाश्च चत्वारः सन्ति वै ततः ।
तत्स्वार्थव्यवसायाच्च मुक्तः पुरुष उच्यते ॥

ततो ब्रह्मस्वरूपाणां चतुर्णामेव चोच्यते ।
गायत्रीदर्शनादेव त्रैविध्यं विषयादिभिः ॥

चातुर्विध्यं च योगेन तदिदं परमं मतम् ।
ज्ञेयत्वेन चेप्सितं यद्यच्च वै कर्मसाधनम् ॥

संबन्धश्च तथा यश्च कारणं विश्वसंस्थितेः ।
ब्रह्मविज्ञानरूपो यो योगहेतुः सनातनः ॥

योगश्चैव तुरीयश्च प्रपञ्चोपशमार्थकः ।
क्रमेणैतानि चत्वारि चतुर्भिश्चरणैः पुनः ॥

गायत्र्याः परिबुध्यन्ते ततो ब्रह्म चतुर्विधम् ।
विषयाद्यैश्चतुर्भिश्च योगिभिः समुपास्यताम् ॥

एवं चतुर्विधं ब्रह्म संसारश्चैव तादृशः ।
पादः स्याद्ब्रह्मणश्चैकः पुरुषाख्यस्य तस्य हि ॥

दिव्ये कोशे तु पुरुषस्त्रिपाच्चेति निगद्यते ।
तच्छुद्धपुरुषांशस्तु सर्वात्मनि च दृश्यते ॥

तस्मात्त्रिपादो भगवान्पुरुषाख्यः परेश्वरः ।
दहराकाशनिलयो योगिभिः समुपास्यते ॥

ये चैवोपासकास्ते तु संसारं च चतुर्विधम् ।
अधितिष्ठन्त यच्चैकं पञ्चमं ब्रह्म शाश्वतम् ॥

पुरुषाख्यं च भवति तस्य सामीप्यमेव हि ।
तत्परंप्राप्तिरूपं च प्रेप्सवो नियतक्रियाः ॥

स्वस्वसंसारनियतब्रह्मरूपं यथाविधि ।
व्यवसायस्य सिध्यर्थं स्वानुरूपस्य सर्वथा ॥

ज्ञानादिभिश्चतुर्भिश्च नित्यं हि समुपासते ।
आपरमात्मसंसारं सर्वैश्चैवाधिकारिभिः ॥

त्रिभिर्ज्ञानादिभिश्चैव तद्ब्रह्म समुपास्यते ।
महर्लोकं समाक्रम्य चैते ज्ञानादिभिस्त्रिभिः ॥

यथाक्रमं यथान्यायं व्यवसायं यथायुगम् ।
कुर्वन्ति ब्रह्मभावेन परमात्मानमव्ययम् ॥

कारणं लयभावं च शान्ता हि समुपासते ।
एते च शुद्धसिद्धान्ते मान्या इति हि निर्णयः ॥

इति व्याख्याति तच्चैव ह्यस्माकं परमं मतम् ।
इत्थं प्रणवमाहात्म्यं श्रूयते मुनिपुङ्गवाः ॥

ओङ्कारः सर्वभावस्य ब्रह्मणो ह्यस्ति वाचकः ।
नैव ब्रह्मणि सङ्केतो भवत्योमिति शब्दतः ॥



शब्दार्थयोस्तु संबन्धे सति चास्ति सनातने ।
सङ्केतश्चेति सिद्धान्तस्ततोऽसौ ब्रह्मवाचकः ॥

ओङ्कारोविश्वरूपोऽयं सगुणश्चैव निर्गुणः ।
सर्वास्पदो ह्यसदनो ब्रह्मलक्षणविग्रहः ॥

ब्रह्मयन्त्रस्वरूपश्च ब्रह्मधामा सनातनः ।
संश्रूयते हि वेदादौ यः परो मङ्गळार्थकः ॥

शब्दब्रह्मेति तं प्राहुः सर्ववाङ्मयकारणम् ।
ततश्च सर्वशास्त्रार्थः प्रणवादवगम्यते ॥

विद्यानां चैव सर्वासां प्रतिलोकं महर्षिभिः ।
स्वरूपेण स्वभावेन चार्थभेदश्च वर्ण्यते ॥

समन्वयेन सर्वेषामर्थानां चैव निर्णयः ।
विज्ञानात्प्रणवस्यैव भवतीति च निर्णयः ॥

तस्मादोमिति शब्दोऽयं ब्रह्म वक्ति सनातनम् ।
एकं च द्विविधं चैव त्रिविधं च चतुर्विधम् ॥

कारणं देहयन्त्रस्य कुण्डली त्रिमुखी यथा ।
तथा स्यात्सर्वविद्यानां प्रणवस्त्र्यक्षरात्मकः ॥

निरुक्तं बहुधा ह्यस्य शास्त्रैश्चैवं निगद्यते ।
सर्वेषामवनादेव शब्दश्चोमिति गीयते ॥

ब्रह्म प्रणूयते येन प्रणवः स च कथ्यते ।
ओतमस्मिन्जगत्सर्वमिति चोमर्थ उच्यते ॥

इत्थं निरूपितो ह्यर्थः प्रणवस्य कपालिना ।
ज्ञानं सृष्टिस्तथा ध्यानं शान्तिर्मौनं च पञ्चमम् ॥

तद्ब्रह्मविषयाण्येव पञ्च चैतानि येन हि ।
ज्ञायन्ते सोऽयमोङ्कारः पुरुषार्थप्रदो मतः ॥

स्तुतः परमहंसैश्च सोऽयं ब्रह्मस्वरूपभाक् ।
इत्यतो ब्रह्मणश्चैव वाचकः प्रणवो भवेत् ॥

षड्धर्मतत्पराश्चैव विद्यास्तत्त्वार्थदाः पराः ।
गायत्रीपादभूताश्च गायत्र्यर्थपरास्तथा ॥

चतस्रः संप्रजायन्ते चोङ्काराद्ब्रह्मसंमितात् ।
तस्मादेव हि गायत्री माता स्यात्प्रणवः पिता ॥

गायत्रीप्रणवाभ्यां च यस्मात्तत्वं प्रबुध्यते ।
इत्थं भगवता प्रोक्तं नारदेन च राहवे ॥

गायत्रीसंमितान्येव गायत्र्यर्थपराणि च ।
प्रपञ्चोपशमार्थानि योगव्यासकृतानि च ॥

महाभारतसूत्राणि सन्ति धर्मपराणि च ।
मूलभारतमाख्यानं चतुर्विंशतिविक्रमम् ॥



भगवद्भार्गवव्यासप्रोक्तं हंसैश्च सेवितम् ।
तत्सूत्रपरमेवेति शुद्धार्याणां मतं भवेत् ॥

चतुर्विंशत्सहस्रं च तस्माच्चैतन्निगद्यते ।
धर्मजिज्ञासुभिश्चेदं विज्ञेयमिति चोच्यते ॥

सर्वालंबनभूतानि प्राणिनां चैव सर्वशः ।
चतुर्विंशत्स्वरूपाणि तत्त्वानि च महामते ॥

गायत्रीसंज्ञयोक्तानि चेति ज्ञेयं मनीषिभिः ।
प्रणवादेव सर्वाणि तत्त्वानि च विभान्ति हि ॥

एकत्वानेकत्वयुक्तं परं ब्रह्माऽपरं च तत् ।
गायत्रीप्रणवाभ्यां च स्तूयते सर्वलक्षणम् ॥

इत्यतो भारताख्यानमूलभूता चतुष्पदा ।
गायत्री सा च सेव्या स्यादोङ्कारार्था परावरा ॥

ब्रह्माण्डेऽस्मिंश्च सर्वेषु लोकेषु च महर्षिभिः ।
उक्तः स्यात्परविद्येति ह्योङ्कारस्त्र्यक्षरात्मकः ॥

तथा ह्यपरविद्यात्वमन्येषां च निगद्यते ।
विद्याश्चतुर्दश प्रोक्ता ह्यपराश्चेति सूरिभिः ॥

यच्चाधिकारिभिश्चैव योगिभिश्च मुमुक्षुभिः ।
स्वसर्वबन्धनिर्मोक्षप्रार्थनाध्यानपूर्वकम् ॥

ब्रह्मसामीप्यरूपस्य ह्यानन्दस्याप्तये पुनः ।
उपास्यते विशेषेण तच्च ब्रह्म सनातनम् ॥

स्थूलादिपञ्चभिश्चैव स्वभावैरुपलक्षितम् ।
भवतीति वदत्येव परा विद्या महार्थदा ॥

समष्टिव्यष्टिभावेन मता विद्या परा द्विधा ।
स्थूलं सूक्ष्मं कारणं च तुरीयमथ पञ्चमम् ॥

इति नामस्वभावस्य ब्रह्मणो हि निगद्यते ।
आतुरीयं भवेद्व्यष्ट्या समष्ट्या पञ्चमं स्तुतम् ॥

चत्वारः सन्ति वाक्यार्था व्यष्टिप्रणवभाषिताः ।
यथावाक्यार्थमेव स्युः पादाश्चत्वार एव च ॥

तत्र च प्रथमः प्रोक्तो ज्ञानपादः क्रियात्मकः ।
पादो द्वितीयः कथितस्तृतीयो भक्तिलक्षणः ॥

पादः स्याच्चाथ योगात्मा तुरीयः पाद उच्यते ।
प्रतिपादं च षड्धर्माः सन्ति पादाधिकारिणाम् ॥

तत एव हि सादृश्यं गायत्र्याः प्रणवे भवेत् ।
तस्माच्च ब्रह्मणि श्रौतं सादृश्यं च भवेत्परम् ॥

गायत्र्याश्चेति सिद्धान्तस्तस्मादेव महर्षिभिः ।
गायत्रीप्रणवयोश्च ह्यभेदः परिकथ्यते ॥



सन्ति क्रियादिभेदेन प्रतिपादं व्यवस्थिताः ।
पादाश्चैव हि षड्धर्मास्तत एव तु षोडश ॥

प्रसिद्धाश्चैव संसारा भवन्तीति परं मतम् ।
तत्तत्संसारिणां प्रोक्ता व्यवसायसुसिद्धये ॥

धर्माः षडेते च मतास्तत्त्वमूलाः सनातनाः ।
तस्मात्सनातनो धर्मो महान्प्रणवभाषितः ॥

तत्तत्पादार्थभूतं यत्स्वरूपं ब्रह्मणो भवेत् ।
इत्थं तच्च विचार्यं स्यादधिकारिभिरादरात् ॥

व्यष्टिप्रणवदृष्ट्या तु चत्वारो ब्रह्मवाचकाः ।
प्रणवस्याश्च तत्र स्यादकारः प्रथमो मतः ॥

उकारः स्याद्द्वितीयश्च तृतीयश्चात्र कथ्यते ।
मकारश्च तुरीयस्तु स्यादोङ्कारः समाहृतः ॥

अकारोकारमकारा ये च सन्ति विशेषतः ।
तेषां समाहार इति द्वंद्ववृत्तौ भवेदतः ॥

समाहारस्तुरीयश्च स्याद्भावत्रयनाशकः ।
तस्मादयं समाहारः प्रणवार्थो भवेन्मतः ॥

एकार्थी भावना चापि शब्दार्थानां यदा भवेत् ।
तदा समाहारवृत्तिर्द्वंद्वः स्यादिति कथ्यते ॥

पृथक्त्वेन च ये दृष्टाः समाहारे महामते ।
शब्दार्थानां च तेषां हि भवेदेकत्वमाश्रुतम् ॥

तस्मादेकत्वयुक्तस्तु यश्चोङ्कारः समाहृतः ।
सोऽयं प्रणवसंस्थः स्यात्तुरीयार्थस्य वाचकः ॥

व्यष्टयर्थमूलकश्चैव समाहारो यतो भवेत् ।
सोऽयं ततो व्यष्टिभावप्रणवादेव बुध्यते ॥

विश्वमात्रं समाविश्य संस्थितः स्थूलपालकः ।
प्रधानपुरुषो जाग्रत्स्थानी ह्यन्नपुरो महान् ॥

परिस्पष्टवपुर्विश्वनामा यश्च विराण्मतः ।
सोऽयं भवेदकारार्थो ब्रह्मांशः प्रथमः श्रुतः ॥

सनातनं महाधर्मं विश्वं चैव नरान्तथा ।
शास्तृत्वाच्च स्वयोगेन विश्वं व्याप्य स्थितश्च यः ॥

नरनारायणांशोऽयं प्रणवप्रथमांशगः ।
नाम्ना वैश्वानरश्चेति शुद्धार्यैः समुदीर्यते ॥

ब्रह्मणो हि द्वितीयांशो यो भवेद्व्यष्टिदर्शनात् ।
उकारार्थः सोऽयमेव तैजसश्चेति कीर्त्यते ॥

स च सूक्ष्माभिमानी च स्वप्नावस्थो हिरण्मयः ।
सुखदुःखाभिमानी च जीवः संसारसंस्थितः ॥



प्राणादिकोशत्रितयमधितिष्ठन्विराजते ।
स्वसंसारानुरूपैश्च कर्मभिर्वेदबोधितैः ॥

स्वर्गादिपुण्यलोकांश्च सोऽयमेव हि गच्छति ।
तथा च निन्दितैश्चैव कर्मभिस्त्वयमेव हि ॥

नरकं समवाप्नोति दुःखभोगाय कल्पितम् ।
अस्य संसारमूलं च सुखदुःखादिकं भवेत् ॥

तृतीयो ब्रह्मणो ह्यंशो मकारार्थः प्रकीर्त्यते ।
ईश्वरः प्राज्ञनामा च सोऽयं कारणविग्रहः ॥

स्वरूपसुखभोक्ता च सुषुप्तिस्थानसंस्थितः ।
आनन्दकोशो भगवानस्ति देवः सनातनः ॥

तुरीयो ब्रह्मणो ह्यंशः समाहारस्वरूपवान् ।
संयोगस्य वियोगस्य हेतुः सूत्रात्मसंज्ञकः ॥

परमात्मस्वरूपश्च जगज्जन्मादिकारणम् ।
एषलोकेश्वरः प्रोक्तः सर्वलक्षणलक्षितः ॥

प्रपञ्चोपशमस्थाश्च चत्वारो येऽत्र कीर्तिताः ।
ब्रह्मांशास्ते चतुर्भिश्च वेदैः स्युः समभिष्टुताः ॥

तुरीयातीतरूपं च बिन्दुमण्डललक्षितम् ।
सर्वरूपं सर्वभावं पञ्चमं सर्वतः परम् ॥

समष्टिप्रणववाच्यं यच्च सर्वत्र संस्थितम् ।
तच्च शुद्धं परं ब्रह्म पुरुषाख्यं विराजते ॥

इत्येवं नारदेनोक्तः प्रणवार्थश्च पञ्चधा ।
विज्ञेयः स्याद्यथातत्त्वं मुमुक्षुभिरिहादरात् ॥

प्रपञ्चोपशमाख्यं तु ब्रह्म यच्च चतुर्विधम् ।
तच्च गीतोपदिष्टं स्यादेवं भगवता पुरा ॥

चतुर्धाहं विभक्तात्मा चरामि जगतो हितः ।
लोकानां धारणार्थाय विधानं विदधामि च ॥

यत्स्वभावात्मतत्त्वज्ञैः कारणैरुपलभ्यते ।
अनादिमध्यनिधनः सोऽविभाव्योऽस्मि शाश्वतः ॥

यत्तु मे परमं गुह्यं रूपं सूक्ष्मार्थदर्शिभिः ।
गृह्यते सूक्ष्मभावज्ञैः सोऽविभाव्योऽस्मि शाश्वतः ॥

तत्तु मे परमं गुह्यं येन व्याप्तमिदं जगत् ।
मनोबुद्धिगतः श्रेयो विदधामि नरर्षभ ॥

मां तु ज्ञातुं कृता बुद्धिर्भवता मानवोत्तम ।
शृणु योऽहं यतश्चाहं यदर्थश्चाहमुद्यतः ॥

एका मूर्तिर्निर्गुणाख्या योगं परममास्थिता ।
द्वितीया सृजते तात भूतग्रामं चराचरम् ॥



सृष्टं संहरतेऽन्या हि जगत्स्थावरजंगमम् ।
क्षपयन्ती मोहयति आत्मनिष्ठा स्वमायया ॥

चतुर्थी मे महामूर्तिर्जगद्वृद्धिं ददाति सा ।
रक्षते चापि नियता सोऽहमस्मि नभश्चरः ॥

मया सर्वमिदं व्याप्तं मयि सर्वं प्रतिष्ठितम् ।
अहं सर्वजगद्बीजं सर्वत्र गतिरव्ययः ॥

इति द्वितीये चाध्याये तस्मादित्थं हि बुध्यते ।
व्यष्टिप्रणववाच्यश्च भगवान्परमेश्वरः ॥

नरनारायणाख्यश्च त्रितयात्मजगत्परः ।
तथा तुरीयो योगात्मा चेति सर्वं समञ्जसम् ॥

इत्यतः सर्वविद्यानां प्रणवाख्याऽखिलार्थदा ।
विद्या परेति कथिता श्रुतिभिश्चेति निश्चयः ॥

एवं प्रणवमाहात्म्यं नारदोक्तं मुमुक्षुभिः ।
विज्ञेयमिति सिद्धान्तो भारतादवगम्यते ॥

तस्माच्च भारताख्यानं भार्गवं मनुसंमितम् ।
गायत्रीमूलकं चेति प्रोच्यते शुद्धयोगिभिः ॥

तत्कार्ष्णं भारतं चापि गायत्रीपरमुच्यते ।
प्रणवार्थस्तु गायत्र्याः गायत्र्यर्थस्तु भारतात् ॥

भवेत्ततो भारतं स्यात्प्रणवार्थपरायणम् ।
ततो वेद्यं भारतं स्यात्सानुबन्धिद्वयं परम् ॥"

इति स्वभारतार्थकारिकायाम्, चतुर्विंशत्सहस्रिकाया भारतसंहिताया भगवद्भार्गवदृष्टायाश्च प्रणवार्थपरगायत्रीमूलकत्वनिरूपणावसरे हि—सर्वातीतानतीतावस्थब्रह्मस्वरूपम्, तद्ब्रह्मविदास्तिक्यश्रैष्ठ्यनिरूपणपूर्वकमास्तिक्यनास्तिक्यरहस्यार्थः, अपरावस्थोपहितब्रह्मण एव यथाधिकारं संसारितदितरजनोपास्यत्वेन पञ्चधा भासमानत्वम्, पुरुषः परमात्माऽऽत्मा जीवोऽक्षरश्चेति तद्ब्रह्मणो नामपञ्चकम्, ब्रह्मस्वरूपाणां च तेषां प्रवृत्तत्वादिभिश्च त्रिभिर्धर्मैस्त्रैविध्यम्, प्रवृत्तत्वादीनां च त्रयाणां प्रत्येकं विषयादिभिस्त्रिभिश्च स्वभावैस्त्रैविध्यम्, पञ्चसु ब्रह्मस्वरूपेष्वात्मादीनां त्रयाणां प्रवृत्ताख्यत्वम्, द्वितीयस्य तुरीयस्य च परमात्मनो निवृत्ताख्यत्वम्, प्रथमस्य च पञ्चमस्य पुरुषस्य तुरीयातीतत्वेन शुद्धाख्यत्वम्, पुरुषभेदवादपरश्च ब्रह्ममुखादिसिद्धान्तः, पुरुषस्य हि पञ्चमस्य सर्वभेदराहित्यप्रतिपादकःशुद्धसिद्धान्तश्च भगवन्नारदानुमतः, शुद्धसिद्धान्ते च त्रिपदायाश्चतुष्पदायाश्च गायत्र्याः दर्शनेन हि ब्रह्मणस्त्रैविध्यं चातुर्विध्यं च, अधिकारिभेदेन तद्ब्रह्मोपासनाप्रकारः, ततो गायत्रीदर्शनमूलभूतसनातनधर्मदर्शनपरप्रणवशास्त्रस्य माहात्म्यनिरूपणावसरे च तस्य प्रणवस्य, ब्रह्मवाचकत्वसमर्थनम्, सगुणनिर्गुणरूपत्वेन ब्रह्मप्रतिमाभूतत्वम्, शुद्धयोगिब्रह्मोपासनासाधनाक्षरयन्त्ररूपत्वम्, प्रपञ्चपरेभ्यो योगिभ्यश्च सर्वेभ्यो ह्यधिकारिभ्यः सर्वमन्त्रोच्चारणाद्योच्चारणेन समस्तमङ्गळार्थप्रदातृत्वम्, सर्वशास्त्रार्थमूलार्थवत्वेन सर्ववाङ्मयकारणत्वेन च शब्दब्रह्मस्वरूपत्वम्, सर्वशास्त्रार्थसमन्वयार्थबोधकत्वेन समस्तव्यस्तब्रह्मस्वरूपप्रतिपादकत्वम्, सर्वकारणाक्षरैरकारादिभिश्च त्रिभिस्तथा वाक्यार्थचतुष्टयेन च गुंभितत्वम्, निरुक्तार्थप्रकाराः, चतुर्विंशत्तत्त्वविद्यात्मिकायाः कर्मज्ञानभक्तियोगार्थकचतुश्चरणायाश्च गायत्र्याः सञ्जनकत्वं चेति यत्तत्सर्वम्, क्रमशः सयुक्तिकं व्याख्याति । ततश्च स्वोक्तार्थदृढीकरणाय नारदराहुसंवादार्थं च निरूपयामास । तस्मिन्नारदराहुसंवादे तु गोभिलाभिनिरूपिते क्रमशः—योगव्यासीयानां च महाभारतसूत्राणां तत्त्वविद्यामूलकत्वम्, चतुर्विंशत्सहस्रिकायाश्च भार्गवभारतसंहितायास्तद्भारतसूत्रमूलकत्वम्, तत्त्वविद्यानां गायत्र्याख्यत्वम्, प्रणवस्य च सर्वतत्त्वार्थप्रकाशकत्वम्, ब्रह्मणश्च परापरस्वरूपस्य गायत्रीप्रणवसंस्तुतत्वम्, भारताख्यानस्य तत्त्वविद्यामूलकत्वम्, गायत्र्याश्च तत्त्वविद्यायाः प्रणवार्थरूपत्वेन सर्वसेव्यत्वम्, प्रणवस्य परविद्यात्वकथनपूर्वकं तस्य तत्तदधिकारिसमुपास्यमानस्थूलाद्युपाध्युपहितब्रह्मस्वरूपप्रतिपादकत्वम्, परविद्यायाश्च समष्टिव्यष्टिभावेन द्वैविध्यम्, स्थूलाद्यवस्थोपहितेषु च पञ्चब्रह्मस्वरूपेषु स्थूलसूक्ष्मकारणतुरीयाणां व्यष्टिप्रणवाभिष्टुतत्वम्, पुरुषस्य च तुरीयातीतस्य समष्टिप्रणवाभिवर्णितत्वम्, व्यष्टि-

प्रणवार्थदृष्ट्या तु वाक्यार्थचातुर्विध्यम्, यथा वाक्यार्थे पादभेदस्तत्स्वरूपम्, पादानां च प्रत्येकं षड्गुर्मवत्वम्, गायत्रीब्रह्मणोः प्ररस्परसादृश्यम्, प्रणवगायत्र्योश्चाभेदः, तत्पादानां च प्रत्येकं प्रादचतुष्टयपरिवर्तननियमेन संसारस्य षोडशस्वभावात्मकत्वम्, प्रणवस्य सनातनधर्मावबोधकत्वम्, तत्स्वरूपविचारः, अकाराद्यक्षरवाच्यवस्तुस्वरूपाभिवर्णनम्, समष्टिप्रणववाच्यपुरुषस्वरूपमित्येतत्सर्वं प्रतिपादितं भवति । ततश्च चतुर्विधस्य व्यष्टिप्रणववाच्यस्य ब्रह्मस्वरूपस्य नरनारायणस्वरूपत्वप्रदर्शकनरनारायणधर्मगीतावचनानि, तावता च महाभारतस्य प्रणवमूलकत्वं च व्याजहार ।

## प्रणवाध्ययनाध्यापनावश्यकत्वम् ।

अत एव प्रणवविद्याध्ययनाध्यापनावश्यकत्वं चेत्थं विहितं भवति माण्डूक्योपनिषदि-

"ओङ्कारं पादशो विद्यात्पादा मात्रा न संशयः ।
ओङ्कारं पादशो ज्ञात्वा न किञ्चिदपि चिन्तयेत् ॥

युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम् ।
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ॥

प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः ।
अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः ॥



सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ॥

प्रणवं हीश्वरं विद्यात्सर्वस्य हृदये स्थितम् ।
सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति ॥

अमात्रोऽनन्तमात्रश्च द्वंद्वस्योपशमः शिवः ।
ओङ्कारो विदितो येन (स मुनिर्नेतरो जनः) ॥"

इति । एवं भगवता गोभिलेनापि भारतकारिकायाम्—

"सर्वेषां च पदार्थानां विभागो गुणकर्मभिः ।
गुणकर्मोपशमे च सति योगः सनातनः ॥

दृश्यते चेति सिद्धान्तः सर्वैरभ्युपगम्यते ।
तत्समष्टिव्यष्टिरूपप्रणवार्थविशारदैः ॥

वस्तुतस्तु पदार्थानामेकत्वं न्यायसंमतम् ।
एकमेवेति च श्रुत्या सर्वं ब्रह्म सनातनम् ॥

ततः कर्मचितानां च लोकानां वै महर्षयः ।
परीक्षा योगिभिः कार्या दृष्टिभिस्तिसृभिः क्रमात् ॥

तत्परीक्षाप्रकारश्च व्याख्यातः स्यान्महर्षिभिः ।
हंसैः पूर्वैश्च शुद्धार्यैः परीक्षा चैवमीरिता ॥

अतः परीक्षकैश्चैव परप्रेप्सुमुमुक्षुभिः ।
तत्परीक्षाप्रकारश्च विज्ञेयः स्याद्यथाविधि ॥

याश्च ह्यपरविद्येति श्रुतिभिस्त्वभिवर्णिताः ।
ताभिश्चापरविद्याभिः पदार्थानां विशेषतः ॥

विभागो ह्युच्यते चैवं लोकानां गुणकर्मभिः ।
ताभिश्चोच्चावचत्वं तु प्राणिषु संप्रकल्प्यते ॥

मानवेष्वेव सर्वेषु समरूपेषु सर्वथा ।
गोत्रसूत्रादिकं चैव विभागादेव बुध्यते ॥

अपराभ्यश्च विद्याभ्यो भारताख्या श्रुतिः परा ।
अस्या ह्यध्ययनादेव पुराणानां च सर्वशः ॥

भवेत्समन्वयेनार्थबोधः सञ्जायते परः ।
व्यासाः पौराणिकाः केचिद्विभागासक्तबुद्धयः ॥

देवतासु मनुष्येषु पशुष्वन्यासु योनिषु ।
प्रत्येकं विद्यमानं च परं भावं विशेषतः ॥

तयैव हि प्रकृत्या च स्तुवन्तीति च निश्चयः ।
निन्दन्ति च तथा केचित्तादृशास्त्वविपश्चितः ॥

नैव जानन्ति ते सर्वे सर्वत्र समवस्थितम् ।
सनातनं ब्रह्मतत्त्वं सर्वभावं परापरम् ॥



सर्वमूलं विशुद्धं च राजयोगैकसंश्रयम् ।
ततः पञ्चलक्षणानि पुराणानीति कथ्यते ॥

द्वे विद्ये वेदितव्येति श्रुतेर्विद्या मता द्विधा ।
विद्याऽविद्याविभागेन विद्या स्यात्प्रणवाख्यया ॥

परा विद्येति सैवोक्ता ह्यविद्या त्वपरेति च ।
श्रुतिभिः कथ्यते चैवं सर्वाभिश्च महर्षयः ॥

सहैवापरविद्याभिश्चान्वयेन हि सर्वदा ।
परा विद्या च साऽध्येया त्र्यक्षरा सा चतुष्पदा ॥

तयोरैक्येन विज्ञाने विद्यया हि मुमुक्षुभिः ।
अमृतत्वं विशुद्धं च प्राप्तिरूपं प्रपद्यते ॥

अविद्यया भवेन्मृत्युतरणं सर्वदेहिनाम् ।
तस्मात्तयोरन्वयेन विज्ञानं विहितं भवेत् ॥

विज्ञेयास्त्वन्वयगतिः प्रत्येकं विद्ययोस्तयोः ।
तयोरन्वितयोश्चैव पुनरन्वय उच्यते ॥

सनातनस्तत्वमूलः शाश्वतः परया तया ।
अतो योगब्रह्मविद्या प्रणवार्थेति कथ्यते ॥

विद्याधिकारिणां तेषां नैव बन्धः स्वभावतः ।
तदुपास्यं परं ब्रह्म शुद्धमेव विराजते ॥

सच्चिदानन्दरूपं तु ब्रह्म यच्च सनातनम् ।
तच्चाविद्यापराणां तु समुपास्यं विराजते ॥

अनन्वितामविद्यां तु ये भजन्ति च मानवाः ।
ते च नाना रूपमेव ब्रह्म स्वेष्टं ह्युपासते ॥

अनन्वितां तु विद्यां च ये चैव समुपासते ।
ते भवेरन्मृत्युपराश्चेति श्रुतिभिरुच्यते ॥

एवं महर्षयः केचित्तत्तच्छास्त्रप्रवर्तकाः ।
गुणत्रयमवष्टभ्य व्याजह्रुस्तत्त्वमुत्तमम् ॥

अत एव हि विद्यासु काश्चित्सत्वपरा मताः ।
रजोगुणप्रधानाश्च काश्चित्तामसधर्मगाः ॥

इति पौराणिकव्यासैः कैश्चिच्छुद्धैश्च योगिभिः ।
उक्तं पुराणशास्त्राणां तथान्येषां च लक्षणम् ॥

तस्मादेव हि शास्त्राणां सर्वेषां हि महर्षयः ।
समन्वयेन विज्ञानं परीक्षार्थकमुच्यते ॥

अणूनां चैव सर्वेषां प्रत्येकं हि महर्षयः ।
परोऽपरश्च भावो हि दृश्यते तत्स्वभावतः ॥

आत्मदृष्ट्या परो भावो भवेत्संसारदर्शनात् ।
अपरश्च तथा शुद्धदृष्ट्या भावः समो भवेत् ॥



एवं त्रयाणां भावानां विज्ञानं तत्त्वदर्शनात् ।
निगद्यते परीक्षेति भारतार्थविशारदैः ॥

एवं परीक्षाशुद्धानां तत्त्वदर्शनतत्परा ।
प्रोक्ता प्राचीनहंसैश्च नारदादिमहर्षिभिः ॥

सर्वत्र समवेतश्च सूत्रात्मा योगिवल्लभः ।
स्थूलसूक्ष्मकारणाख्यैर्भेदैश्चायं सनातनः ॥

परमात्मेति भावेन बुध्यते शुद्धयोगिभिः ।
अत्र जीवेश्वराख्यश्च वादो वादिभिरुच्यते ॥

जीवेश्वरविभागे च सति स्थूलादिपालकाः ।
केचिज्जीवा इति प्रोक्तः सिद्धान्तो हंससंमतः ॥

ततस्ते चैव केषां चिन्नियन्तारो भवन्ति हि ।
जीवाख्यानां च लोकानां ततस्ते लोकपालकाः ॥

तेभ्यश्च परमात्मा तु विशिष्टो योगमायया ।
सर्वाधिकारी भवति स तुरीयो निगद्यते ॥

अधिकारिपदातीतमधिकारिस्वरूपवत् ।
पुल्लिङ्गेन राजमानं पुरुषाख्यं परात्परम् ॥

यच्च ब्रह्म न तस्मिंश्च भेदो जीवेश्वराख्यया ।
शुद्धं तदिति विज्ञेयं सर्वभावं समं परम् ॥

आनन्दकोशनिलयं पञ्चमं मौनभावितम् ।
परापरस्वभावश्च तस्मिन्ब्रह्मणि दृश्यते ॥

स्वभावः प्रकृतिश्चेति बुध्यते सांख्यशास्त्रतः ।
या परा प्रकृतिश्चैव कथ्यते सेऽयमेव हि ॥

जीवः स्यात्स हि लोकस्य देहस्य च नियामकः ।
या भवेदष्टभिर्भेदैः पृथिव्यादिभिरेव हि ॥

ब्रह्मणः स्थूलरूपा च कारणं सर्वकर्मणाम् ।
सैवाऽपरेति विज्ञेयं शुद्धैश्चैव मुमुक्षुभिः ॥

एवं परापरे चैव प्रकृती ब्रह्मणः स्वतः ।
भवेतां देहभूतेति सिद्धान्तः शुद्धसंमतः ॥

स्युरासु समवेताश्च गुणाः प्रकृतिषु स्वतः ।
गुणोद्भेदो जीवयोगात्प्रकृतेरभिजायते ॥

तत्र भेदा ह्यनेकाश्च प्रथमं तु निरूपिताः ।
ततः संसारिणां भेदो गौणः स्याद्धि परस्परम् ॥

तस्मात्परीक्षा लोकानामेवं साधुनिरूपिता ।
महानिर्वेदहेतुश्च परीक्षा तत्त्वसंस्थितिः ॥

यथाधिकारं सर्वेषां सर्वलोकेषु सा भवेत् ।
तयैव ब्रह्मभावश्च बुध्यते हि मुमुक्षुभिः ॥



तच्छुद्धदर्शने ह्यस्मिन्परीक्षा शुद्धदृष्टिजा ।
ततश्चैव हि शुद्धानां पुंसां चैव महात्मनाम् ॥

कर्तव्यं चाप्यकर्तव्यं नियतं नास्ति कुत्रचित् ।
कालदेशोचितं सर्वं कार्यमेवेति तन्मतम् ॥

अनुभाव्यं हि सर्वं स्याच्छुद्धैरध्यात्मकोविदैः ।
इति हंसा वदन्त्यत्र समाः समविभूतयः ॥

इदं त्याज्यमिदं त्याज्यमादेयमिदमेव हि ।
इति भावश्च शुद्धानां न कदापि भवेदतः ॥

प्रणवश्च परा विद्या शुद्धैश्चैव हि योगिभिः ।
अन्यैः संसारिभिश्चैव ह्यध्येया स्याद्यथाविधि ॥

सैव ह्यध्यापनीया स्यात्पुरुषैरधिकारिभिः ।
सैव स्याच्छ्रेयसे नृणां सर्वेषामिति हि श्रुतिः ॥"

इति, प्रणवस्याध्ययनाध्यापनावश्यकत्वविज्ञानाय क्रमशश्चैवमर्थविशेषाः प्रतिपादिता भवन्ति । तत्र प्रथमम्—पदार्थानां च सर्वेषां गुणकर्ममूलस्य नानात्वस्य तदुपशमकारणस्य चैकत्वस्य तथा ब्रह्मणस्त्रित्वैकत्वविशिष्टस्य च व्यष्टिसमष्टिस्वरूपप्रणवावबोध्यत्वम्, ब्रह्मणश्च तस्य सर्वस्वभाववत्त्वम्, कर्मैकशरणानां तदन्येषां च लोकानां यथादृष्ट्यधिकारिपुरुषपरीक्ष्यत्वम्, तत्परीक्षायाश्च तत्त्रित्वैकत्वविशिष्टस्वरूपब्रह्मसामान्यविज्ञानजन्यत्वम्, परप्रेप्सूनां च मुमुक्षूणां

कर्तव्यत्वेन परीक्षाया ह्यावश्यकत्वं चोक्तं भवति । ततश्च समन्वयेन विज्ञानस्य परीक्षार्थकत्वेन तदर्थं हि तत्तदधिकारिपुरुषवेद्यत्वेन च ब्रह्मविज्ञानस्वभावसिद्धानां यथाधिकारं तत्तत्संसारव्यवसायप्रकार-मावेदयन्तीनां चत्वारो वेदाः षडङ्गानि मीमांसान्यायपुराणधर्मशा-स्त्राणीति प्रसिद्धानां च विभागपराणां चापरविद्यानां स्वभावः, एवं तद्विद्याप्रवर्तकाचार्यस्वरूपम्, तद्विद्याद्वैविध्यम्, तत्तद्विद्यानां सम-न्वयविज्ञानस्य प्रयोजनं च सर्वमेतद्यथातत्वं प्रतिपादितं भवति । अथ च प्रत्येकं हि सर्वेषां परमाणूनां भावत्रयात्मकत्वम्, तद्भाव-त्रयविज्ञानस्य परीक्षास्वरूपत्वं च व्याख्यातं भवति । ततो ब्रह्म-णश्च प्रणववाच्यस्य यथाधिकारं पञ्चधा विद्यमानत्वमात्मानात्म-शरीरत्वम्, ततश्च शुद्धानामधिकारिणां स्वभावः, प्रणवविद्याध्यय-नाध्यापनावश्यकत्वं च परीक्षार्थकं सप्रमाणमुपपादितं भवति ।

## प्रणववादः ।

अतश्चैवं महार्थं स्वरूपस्वभावसुप्रसिद्धं सर्वश्रुतीतिहासपुरा-णादिसंस्तुतमकारोकारमकारनादबिन्द्वात्मकं परब्रह्मस्वरूपस्वभाव-बोधकं तत्प्रतिमाभूतं च प्रणवं व्याचिख्यासुर्भगवान्गार्ग्यायणो महर्षिश्च तदिदं मुमुक्षुभोग्यं प्रणवव्याख्यानरूपं च प्रणववादाख्यं शास्त्रं हि सर्वशास्त्ररहस्यार्थसमन्वयनिरूपणपूर्वकं चकार । इत्थं हि वदति महर्षिः स्वप्रबन्धस्यावश्यकत्वं सर्ववेद्यत्वं च संग्रहेण प्रथमप्रकरणे च प्रथमपटले—" एतदावश्यकत्वं चेत्थम्—दृश्य-



तामिह सर्वं कार्यजातं सत्यां ह्यावश्यकतायां तत्तत्कालनियतायां भवति, तदनुरोधेन चैतद्ग्रन्थनिर्माणावश्यकत्वं संभवतीति " "इदं च शास्त्रम्, एतद्व्यवहिताऽव्यवहितम्, परम्, अतीतम्, प्रधाना-प्रधानरूपम्, जगदशेषमेव ब्रह्मेतीत्थं प्रतिपादयति " " एवमे-तद्ग्रन्थाध्ययनेन सर्वशास्त्रार्थसमन्वयेन चैक्ये सति, सर्वशास्त्रा-र्थानां परस्परार्थविरोधः कदापि न संभवतीत्यनुशिक्षितं भवति । विना चैतादृशं प्रणवशास्त्राध्ययनं सर्वस्मिन्विरोधसंभावनमपरिहार्यं भवेत् " " इदं च प्रणवशास्त्रं षोडशसहस्रैर्ग्रन्थैः तत्तद्देशकालज्ञाना-नुगुणं महावाक्यविशिष्टं यावदवश्यकमाख्यातम् । यद्यपि मयि नैतादृशी प्रज्ञा, यथा प्रणवार्णवादिषु ग्रन्थेषु यथावत्सारपरिज्ञानं भवति; तथापि स्वानुभवेन चैतादृशशास्त्राध्ययनेन च यावदुप-लब्धं प्राधान्यं परब्रह्मतत्त्वं वेदान्ताद्युपयुक्तम्, तावदत्र प्रदर्शि-तमस्ति । इदमपि बालानां सामान्यज्ञानार्थं साधारणं वेदितव्यम्, एतदभावेऽन्यत्र महावाक्यविशिष्टस्य प्रणवशास्त्रस्यादर्शनेन चेदं शास्त्रं समारब्धम् " " अस्मिंश्च प्रणववादे सर्वप्रणवशास्त्रार्थस्य सत्वादन्येषामतिविस्तृतत्वाच्च । इदमेव प्रणववादशास्त्रं सर्वप्रणव-शास्त्रार्थसंग्राहकं महर्षिसम्मतं वेदसंमतं च भवतीति बालानां सुखबोधायोपन्यस्तम् । इदं च यथाबुद्धिविभवम्, यथानुभवम्, यथातत्त्वम्, अध्ययनाध्यापनविधया त्याज्योपादेयविवेकेन स्वीकार्यं भवति " " तदित्थं सर्वानुभवसंमतं सर्वसमं सनातनं सिद्धान्ता-

भ्युपहितं प्रणववादशास्त्रमेवं सर्वशिष्टपरंपरागतं परमावश्यकत्वेन वेदितव्यं भवति । यदन्यदपि शास्त्रमेतादृशं शिष्टपरंपरागतम्, तत्सर्वमप्यध्येयं भवतीति ब्रह्मसिद्धान्तः" इति । अत एव—

"अनुग्रहाय लोकानामृषिर्गार्ग्यायणः स्वयम् ।
शास्त्रं प्रणववादाख्यं चकार श्रुतिसम्मतम् ॥

ब्रह्मणः प्रतिमाभूता या च विद्या परा श्रुता ।
तस्या ह्योङ्काररूपायाः कृतं चेदं महर्षिणा ॥

शास्त्रं व्याख्यानरूपेण ज्ञानिनां हृदयंगतम् ।
अनेन शाश्वतो धर्मो रक्ष्यते नात्र संशयः ॥

समाहारो हि शास्त्रेऽस्मिञ्जीवभूतो हि दृश्यते ।
समाहारो हि सर्वात्मा परं ब्रह्मेत्युदाहृतः ॥

प्रणवस्य हि सर्वेभ्यः शास्त्रेभ्यः प्रथमं सता ।
अध्यापनं चाध्ययनं यथाकालं यथामति ॥

यथादेशं सर्वशास्त्रसुसमन्वयपूर्वकम् ।
कर्तव्यमिति सर्वांश्च प्रार्थयत्यादरान्मुनिः ॥"

इति श्री योगानन्दस्वामिभिः स्वकृतप्रणववादार्थदीपिकायामुक्तं भवति । एवमेव—

"शास्त्राणां चैव सर्वेषां ये चार्था लोकभाविताः ।
स्थूलाः सूक्ष्माश्च विद्यन्ते तेषां प्रणवदर्शनात् ॥



त्रिधा समन्वयः प्रोक्तो मया सर्वार्थभूषिते ।
शास्त्रे प्रणववादे च ततश्चास्मिन्यथामति ॥

पुनश्चैव रहस्यार्थस्तस्य सर्वस्य चोच्यते ।
संसारिभिश्चतुर्भिश्च विज्ञेयः सोऽयमेव हि ॥"

इति प्रणवबोधे तन्महर्षिगार्ग्यायणविरचिते प्रतिपादितं भवति ।

अस्ति च शास्त्रमिदं प्रकरणत्रयात्मकम् । तत्र च प्रथमं प्रकृतिसन्धिप्रकरणम् । अत्र हि प्रकृतिस्वरूपं तत्सन्धिस्वरूपं चाख्यातं भवति । यध्युपलभ्यते चात्मा प्रकृतिर्ब्रह्म चेति, तत्प्रकृतिवाच्यं भवति । तत्संयोगवियोगौ हि सन्धिः । ततः प्रथमप्रकरणे पृथक्त्वैकत्वयुक्तं च ब्रह्मस्वरूपमभिवर्णितं भवति । अत्र तु भवति तरङ्गपञ्चकम् । तत्र च प्रथमतरङ्गे प्रणववादशास्त्रप्रतिपाद्यार्थानुक्रमणिका, विषयाधिकारिस्वरूपनिरूपणपूर्वकं च सूक्ता भवति । द्वितीयतरङ्गे च ज्ञानोपहितं तदात्मस्वरूपमकारवाच्यम्, तृतीयतरङ्गे तु तदुकारवाच्यसंसारस्वरूपं च क्रियोपहितम्, तरङ्गे चतुर्थे तदिच्छापरं संयुक्तं विप्रयुक्तं नेति नेत्यभिष्टुतं च ब्रह्मस्वरूपं मकारवाच्यम्, पञ्चमतरङ्गे हि तदेतत्त्रयाणां समाहारार्थकश्च सन्धिः समासवाच्यश्च प्रतिपादितो भवति । ततो द्वितीयं च प्रकारयोगप्रकरणम् । न तत्र हि तरङ्गभेदः । प्रकृतिपदवाच्यानां च पदार्थानामत्र स्वरूपस्वभावसिद्धं च परस्परसापेक्षत्वं व्याख्यातं

भवति । ततश्च भवति प्रकरणं तृतीयं क्रियापरम् । अत्र हि भवन्ति चैकोनचत्वारिंशत्तरङ्गाः । क्रियाप्रकरणे चास्मिन्हि सृष्ट्यैकदेशिकं मन्तव्यामन्तव्यं मुक्तिसाधनं चेति भवन्ति त्रीणि प्रकरणानि । तत्र सृष्ट्यैकदेशिकपरश्च सप्तत्रिंशत्तरङ्गः, अष्टत्रिंशश्च तरङ्गो-मन्तव्यामन्तव्यपरः, मुक्तिसाधनपरश्चैकोनचत्वारिंशस्तरङ्गः, इति विज्ञेयं भवति । त्रीण्येतानि प्रकरणानि च भवन्ति क्रियाप्रकरणान्तर्भूतानि । भवति च सर्वेषामेषां प्रकरणानां परस्परसङ्गतिश्च कार्यकारणभावविज्ञानसिद्धा । तथा हि—प्रथमप्रकरणे च वेद्यविषयाभिवर्णनपरो विज्ञानप्रकारः, द्वितीयप्रकरणे विज्ञानकार्येच्छारूपा च भक्तिः, तृतीयप्रकरणे च तदिच्छाकार्यं कर्म चाभिहितं भवति । अत्राप्येवं कर्म कार्यं च विशेषसर्जनमपि सृष्ट्यैकदेशिकप्रकरणोपपादितं भवति । एवं तत्कार्यं च मन्तव्यामन्तव्यप्रकरणे, तत्कार्यं च मुक्तिसाधनप्रकरणे कथितमिति । इतीत्थं षट्प्रकरणाभिहितः परिवर्तनादिनियमाभ्युपहितः समग्रसमाहाररूपश्च प्रणववादः प्रसिद्धो भवति । अत्र हि प्रणवस्य नाम सर्वबुध्यवगतपदार्थबीजत्वमाख्यातम् । एवं च महर्षेः प्रबन्धपरो ह्याशयश्च निष्पक्षपातं परामृशतां सतां मान्य एव भवेत् । तस्मादिदं प्रणववादाख्यं च शास्त्रं यथाकालं यथादेशं च सर्वेषां त्याज्योपादेयविवेकार्थमावश्यकं शिष्टसम्मतं परब्रह्मतत्त्वार्थबोधकं सर्वशास्त्ररहस्यार्थज्ञापकं सर्वार्थसमन्वयेन परमतत्त्वार्थनिर्णायकं



यथाधिकारं च सर्वैरध्येयमध्यापनीयं च भवेदिति हि सर्वैरभ्युपगन्तव्यम् ।

## अनुबन्धिचतुष्टयम् ।

शास्त्रेऽस्मिंश्च प्रतिपाद्यत्वेन न कश्चिद्विषयोऽपि विशेषतो निर्दिश्य वक्तुं शक्यते, तत्तदधिकारिवेद्यस्य सर्वस्याप्यस्य विषयत्वात् । अत एव "अथ सूचनीयः किल ग्रन्थादौ विषयः संग्रहेण तथैव हि ग्रन्थकाराः, मैवम्, ओमित्येतस्य प्रणवस्यानाद्यनन्तत्वसर्वशास्त्रमूलभूतत्वसर्वबीजत्वसर्ववाचकसर्वविषयकत्वानां प्रतीतेः सर्वशास्त्रस्वरूपत्वाच्च" इत्येतच्छास्त्रकृतैव महर्षिणा निरूपितावत्र पूर्वपक्षसिद्धान्तौ, अतश्च सर्वस्वभावोपेतस्य सर्वमूलस्य सनातनस्य च ब्रह्मणो हि यथा स्वस्वरूपं परप्रेप्सुभिः सर्वैरधिकारिभिश्च वेद्यत्वेन, तथा सर्वशास्त्ररहस्यार्थप्रतिपादकस्य प्रणवस्य च तद्ब्रह्मवाचकत्वेन, प्रबन्धस्यास्य तत्प्रणवव्याख्यानपरत्वेन च सर्वोऽपि मुमुक्षुवेद्यो विषयश्चात्र प्रतिपादित इति महर्षेराशयो विज्ञायते । अत एवाह महर्षिश्चेत्थं प्रबन्धादौ "अत्र हि—सर्वमिदं जगन्मायया विरचितम्, येन येन नियमेन क्रमेण कालदेशक्रियापरस्परसंबन्धः, संयोगवियोगौ, व्यवसायात्मधारणक्षमाधृतिशान्तिभक्तिकर्मोपासनाज्ञानविधिः, कर्म तत्प्राप्यफलस्वरूपम्, तत्तत्स्थाननियोजितपदार्थयाथार्थ्यम्, कार्यकारणकर्तृप्रयोजनसंबन्धः, शक्तिसामर्थ्यम्, साध्यासाध्ये, उत्पत्तिस्थिति-

लयकारणम्, प्रकृतिविकृत्यादितत्त्वम्, पञ्चभूतानि जीवात्मस्वभावः, परमात्माभिदेशः, व्याप्यव्याप्तिव्यापकाव्यपकम्, आवश्यकानावश्यकम्, ध्येयध्यानपदार्थः, सद्गतिदुर्गतिविशेषः, इन्द्रियगोचरम्, विज्ञानगम्यं च भवति; एतत्सर्वार्थप्रतिपादकं परं सर्वाश्रयं समष्टिव्यष्टिस्वरूपं प्रणवसंज्ञमोमित्यनादिशब्दस्वरूपम्, सर्वसिद्धान्तसमन्वयपूर्वकं संक्षिप्तं विस्तृतं च व्याख्यास्यामः" इति। तस्मादधिकारिवेद्यं सर्वमप्यत्र प्रतिपादितामिति सद्भिर्विज्ञेयं भवति। एवमेतत्प्रबन्धाध्ययनेन सर्वेषामधिकारिणामनायासेन हि परस्परं विरुद्धार्थानां च शास्त्राणां समन्वयेन सर्वस्य त्रित्वैकत्वनिश्चयश्च प्रयोजनं भवति। संबन्धश्च भवति प्रतिपाद्यप्रतिपादकभावरूपः, अधिकारिणश्चैतदर्थजिज्ञासवः सर्वेऽपि भवन्तीत्यनुबन्धिचतुष्टयमत्र विज्ञेयम्।

## महावाक्यम्।

महर्षिरयम् "एतदभावेऽन्यत्र महावाक्यविशिष्टस्य प्रणवशास्त्रस्यादर्शनेन चेदं शास्त्रं समारब्धम्" इति स्वप्रबन्धस्य महावाक्यविशिष्टप्रणवव्याख्यानपरत्वेन सर्वेभ्यः प्रणवशास्त्रेभ्योऽभ्यर्हितत्वं तावता च सर्वाधिकार्युपादेयत्वं चाह। अत्र हि किमिदं महावाक्यम्, कीदृशं वा प्रणवस्य तद्वैशिष्ट्यम्, एवं केवलाच्च प्रणवाध्यनान्महावाक्यविशिष्टप्रणवाध्यनस्य किं च वा विशेषप्रयोजनम्, इति च प्रथममवधेयं भवेत्। अतस्तदित्थं



विचार्यते। तथा हि—"ब्रह्मविदाप्नोति परम्" इति तैत्तिरीयश्रुतेः परपदप्रेप्सुभिरधिकारिभिश्च ब्रह्म यथाकालं यथादेशं यथावस्थं यथाक्रमं यथाविधि च श्रवणमननादिभिर्विचार्यम्, एवं विचारसञ्जातसामान्यज्ञानकार्यैश्च कर्मभक्तिज्ञानयोगैः समुपास्यं च भवति। एवं विज्ञानी ब्रह्मोपासक एव ब्रह्मविच्छब्दवाच्यो भवति। अधिक्रियते च तद्ब्रह्मविचारे नानाविधचेतनाचेतनात्मकसंसारविज्ञान्येव पुरुषः, "परीक्ष्यलोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात्" इति श्रुतेः। अतो ह्यधिकारिभिः संसार एव भवति प्रथमं जिज्ञास्यः। यद्यपि संसाराच्च ब्रह्माण्डं विश्वं जगदिति दृश्यते, तथापि ब्रह्माण्डादीनां संसारमूलकत्वादेव हि संसार इति व्यवहारः। अस्ति च संसाराधिपतिः परमो महाविष्णुस्तुरीयः परमात्मा प्रणवस्वरूपश्च समाहारपरः। अस्य च विशेषतश्चिन्मण्डलोद्भिन्नसंसाराधिपतित्वं चेदमनुष्ठानचन्द्रिकायां दासाध्याये प्रतिपादितम्। तदित्थम्—

"नानाभवनसङ्कल्पलोकनेत्र्या परस्य हि।
ब्रह्मणश्च यथारूपं जाते परिणये सति॥

आविर्भवति तस्यैव चात्मानात्मशरीरवत्।
स्वरूपं त्वपरं तस्मिन्त्रीणि स्युर्मण्डलानि च॥

सच्चिदानन्दरूपाणि तत्संसारपराणि च।
तेषु सन्मण्डलेऽप्येवं मण्डलानि भवन्ति च॥

स्थूलं सूक्ष्मं कारणं च तुरीयं चेति भेदतः ।
चत्वारि चैवं स्थूले तु मण्डलेऽस्ति यथाक्रमम् ॥

ब्रह्माण्डादिसप्तकं च चतुर्दशरसात्मकम् ।
चिदानन्दमण्डलेऽपि चैवं भेदश्च शाश्वतः ॥

भवेत्सन्मण्डलस्यैव महाब्रह्मा पतिर्भवेत् ।
तथा चिन्मण्डलस्यैव महाविष्णुः पतिः स्मृतः ॥

आनन्दमण्डलस्यैवं पतिः स्याद्धि महाशिवः ।
प्रणवाध्ययनात्सर्वे तन्त्रत्रयविशारदाः ॥

त्रिमूर्त्यादीन्यथातत्वं सृजन्त्येते स्वशास्त्रतः ।
सन्मण्डले नियन्ताऽस्ति कुमारो भगवान्गुरुः ॥

चिन्मण्डलनियन्तारौ नरनारायणौ श्रुतौ ।
मौनी च दक्षिणामूर्तिरानन्देशः प्रभासते ॥

परमात्मांशभूताः स्युरेते सर्वे यथाबलम् ।
अपरब्रह्मणो रूपं द्विविधं कथितं पुनः ॥

आत्मा च प्रकृतिश्चेति तयोर्योगेन च स्वतः ।
नानात्वं स्यात्तथा वेदाः सेतिहासाः सहस्रशः ॥

चातुर्वर्ण्यविधानं च गुणकर्मविभागशः ।
चत्वारो ह्याश्रमाश्चैव धर्मास्तदनुसारिणः ॥



देवतिर्यङ्मनुष्यादिव्यवहारश्च धर्मतः ।
नानात्वमूलकं सर्वं भवतीति हि निर्णयः ॥

तयोः शुद्धं च योगं हि नानाभावविवर्जितम् ।
सर्वस्वभावयुक्तं च ब्रह्मणः परमात्मनः ॥

विज्ञाय हि यथारूपं हंसाः शुद्धाश्च योगिनः ।
कालदेशोचितं कार्यं कर्म कृत्वा च योगतः ॥

सर्वमावश्यकं चेति पुनरावृत्तिवर्जितम् ।
भजन्ते परसामीप्यमेतत्प्रणवभाषितम् ॥"

इति । यद्यपि महाब्रह्मादिभ्यश्चैभ्यः पूर्वमप्यनन्ता गतिश्चतुष्टय-क्रमोऽपि च बोद्धुं शक्यते, तथापि तदा न तद्बोधसाधनमस्ति । ततश्चाणोरारभ्य महाविष्णुपर्यन्तमेव सर्वेषामस्माकं ज्ञानमस्ति । एवं महाब्रह्मसंसारे महाशिवसंसारे च तावदेव च ज्ञानं भवति सर्वेषामिति विज्ञेयम् । सोऽयं महाविष्णुश्चान्यो वा स्वसंसारारम्भे स्वनियतकार्यविज्ञानाय ब्रह्मस्वरूपस्वभावपरमनाद्यनन्तं षडङ्गं शास्त्रमोमित्येकाक्षरं स्वयोगेन पश्यति । यद्यप्योमिति शब्दश्च महाविष्णोः पूर्वं परमपि च दृश्यते, तथापि तस्यार्थबोधश्चारभ्य महाविष्णुसंसारं भवतीति विज्ञेयम् । संसाराधिपतिस्त्वनेन कृत्या-कृत्यविवेकोदयेन चैकेनैवोमिति शब्देन सर्वं परिभावयति । सर्वेष्वपि च संसारेष्वयमेव भवति सर्वव्यवहारजीवभूतः ।

एतत्परिभावनाकाले त्वोमिति शब्दस्वरूपे समुपस्थिते, भवति चतुर्विधो हि विकासः । तद्विकासानुगुणं हि चतस्रोऽप्यवस्थाः संभवन्ति ज्ञानमिच्छाक्रियासमाहारइत्युक्ताश्च । तदनुगुणं च गायत्री महावाक्यं च संप्रवृत्तमस्ति । तस्मादेव ताभ्यां प्रणवसहिताभ्यां च गायत्रीमहावाक्याभ्यां स्वसंसारकार्यं च, तदिदमित्थं कार्यमावश्यकम्, तदिदमकार्यमित्थमनावश्यकमित्यवधारयति च संसाराधिपतिः । तस्मादोमित्यतो गायत्रीमहावाक्ययोश्च संभवः । न च महाविष्ण्वादयश्च स्वसंसारारंभकाले केवलमोमिति शब्दमेव पश्यन्ति, न तु गायत्रीमहावाक्ये चेति वाच्यम्; केवलमकारोकारमकारात्मकोमिति शब्दस्य विज्ञातत्वेऽपि तस्य योग्यताविरहेण स्वसंसारकार्यपरिभावनायां तेषामशक्तत्वाद्गायत्रीमहावाक्यविशिष्टस्यैव चोमिति शब्दस्य सर्वसंसारकार्यज्ञानकारणयोग्यताविशिष्टत्वाच्च । अत एव हि गायत्र्या मातृत्वं महावाक्यस्य पितृत्वं प्रणवस्य पितामहत्वं च वेदावतारदृष्ट्या तु समुपपादितम् । तस्मात्तादृशोमिति तु महाविष्णोश्चाधिपतेः संक्षिप्तं स्वसंसारव्यवसायव्यवहारलिङ्गं भवतीति विज्ञेयम् । तस्मादेव हि गायत्रीमहावाक्यविशिष्टस्य च प्रणवस्याध्ययनमध्यापनं च महाविष्णोर्विहितं भवति । तत्र गायत्र्याश्च संसारकार्यपूर्वभाविकार्यसामान्यप्रकारबोधकत्वं लक्षणं भवतीति शक्यं वक्तुम् । महावाक्यस्य तु तत्संसारकार्यविशेषप्रकारबोधकत्वं लक्षणं भवति । गायत्रीमहावाक्याभ्यां च वेदोत्पत्ति-



रिति, स च वेदो ह्याचारार्थको भवतीति, ऋग्यजुस्सामाथर्वणां च तेषां चतुर्णां वेदानां वक्तारश्च क्रमाद्विष्णुब्रह्मशिवमहाविष्णव इति, महाविष्णोश्च विष्णुब्रह्मशिवानां संभव इति, एवं गायत्रीमहावाक्ययोः स्वरूपम्, महावाक्यसंख्या, इत्यादिकं च सर्वमस्मिन्प्रबन्धे च प्रणववादे तृतीयप्रकरणे प्रथमद्वितीयतृतीयचतुर्थतरङ्गेषु सम्यग्व्याख्यातं भवति । गायत्री महावाक्यं चेत्थम्—

"सर्वातीतं परं ब्रह्म सिद्धं प्रणवमण्डले ।
तत्त्वात्मानात्मरूपं तु त्रिकोणे मण्डले भवेत् ॥

योगिध्येये च तत्रैवं वर्ण्यते शुद्धयोगिभिः ।
बिन्दुगर्भे त्रिकोणे च ब्रह्म यत्तत्परं हि तत् ॥

स्थितं मूर्ध्नि त्रिकोणस्य स्यान्मायाबीजविग्रहम् ।
दक्षिणे च त्रिकोणस्य पादे त्वात्मा सनातनः ॥

सबीजश्च तथा वामे पादे स्यात्प्रकृतिर्मता ।
एवं कोणत्रयं चैव तत्वत्रयमुदीर्यते ॥

तत्वत्रयं त्रिकोणं तु भक्ता हि समुपासते ।
बीजविद्याप्रभावेन सिद्धमन्त्रेण च स्वतः ॥

गुणत्रयं त्रिकोणे च परिकल्प्य यथामति ।
व्यासाः पौराणिकाश्चैव ब्रह्म वै समुपासते ॥

कोणत्रयस्य तद्ब्रह्मस्वरूपस्य विशेषतः ॥
परस्परं तु योगं च तुरीये परिकल्प्य हि ॥

कर्तारश्चेति हंसानां व्यसाः शुद्धाश्च योगिनः ।
सनातनं सर्वमूलं तद्ब्रह्म समुपासते ॥

तत्परप्रेप्सवश्चैव ज्ञानिनो धर्मवत्सलाः ।
तत्वजिज्ञासवस्तस्य संसारस्य मुमुक्षवः ॥

गायत्रीविद्यया देव्या प्रणवोद्भिन्नरूपया ।
त्रिकोणं तच्च षट्कोणं भूपुरद्वयसंयुतम् ॥

परिकल्प्य यथामेधं पादधर्मानुरूपिणम् ।
ब्रह्मकैवल्यसिध्यर्थं स्वात्मानं समुपासते ॥

गायत्र्याः प्रथमौ पादौ भूद्वयं चेति कथ्यते ।
अपरौ चरणौ द्वौ च पुरद्वयमुदाहृतम् ॥

एवं संकल्पिते चक्रे गायत्रीविद्ययोदिते ।
संसाराख्ये च तत्वानि वेद्यान्येवं मुमुक्षुभिः ॥

तत्वानामष्टकं चैव चतुर्विंशतिसंख्यया ।
कथ्यते तत्र तत्वं तु विकृतिर्गुणकर्मणोः ॥

शुद्धं सत्वं रजश्चैव तमश्चेति गुणा मताः ।
चत्वारस्तैश्च संसारनिर्णयः परिकथ्यते ॥



ततः संसारविज्ञानं गायत्र्या बोधितं भवेत् ।
सनातनश्च धर्मश्च ततोऽध्येया च सोच्यते ॥

योगिनो ब्रह्मनिष्ठाश्च महावाक्यविशारदाः ।
अश्वत्थतत्ववेत्तारः समुपास्य परं प्रभुम् ॥

षट्कोणवेदपादं च यच्चक्रं ज्ञानिभिः स्तुतम् ।
एकाङ्कग्रहणेनैव द्विमुखं परिकल्प्य तत् ॥

परस्मिन्नूर्ध्वमूले च त्रितयं सचराचरम् ।
अपरं च जगत्सर्वं पश्यन्ति ब्रह्मणि स्वयम् ॥

शाखाभूतं जगत्सर्वं मूलं ब्रह्म सनातनम् ।
नित्यसंसारवृक्षस्य धर्माधर्मफलस्य हि ॥

विशिष्यते च सर्वत्र यच्च तद्ब्रह्म शाश्वतम् ।
विशेषमिति विज्ञेयं तस्य धर्मश्च यो भवेत् ॥

तस्य सर्वस्य विज्ञानं महावाक्येन जायते ।
तन्महावाक्यविद्याश्च प्रोक्ताः सन्ति सहस्रशः ॥

संसारिणां योगिनां च प्रत्येकं च स्वधर्मतः ।
सर्वमूलस्य सर्वस्य ब्रह्मणः परमात्मनः ॥

विज्ञानं साधनं दिव्यं परप्राप्तेर्महात्मनाम् ।
तस्मादेव महावाक्यं योगिभिश्चैव सेव्यते ॥

आत्मप्रकारविज्ञानं ज्ञानं सांसारिकं च तत् ।
महावाक्येन गायत्र्या जायते च यथाक्रमम् ॥

योगदण्डं महावाक्यं स्वात्मसाम्राज्यलक्षणम् ।
योगिभिर्धार्यमेतच्च समभावकरं परम् ॥

ओमित्येकाक्षरं वाक्यं महावाक्यं परं भवेत् ।
तस्मादेव हि जायन्ते महावाक्यानि सर्वशः ॥ ''

इत्यनुष्ठानचन्द्रिकायामभिवर्णितं भवति । तेन महावाक्यस्य संसारविशेषधर्मभूतब्रह्मस्वरूपबोधकत्वम्, गायत्र्याश्च संसारसामान्यधर्मभूतब्रह्मस्वभावबोधकत्वं च विज्ञेयं भवति । एवं तत्रैव—

'' तद्गायत्रीस्वरूपत्वं मन्त्राणामस्ति सर्वथा ।
महावाक्यस्वरूपत्वं बीजानां परिकथ्यते ॥

या हि सर्वेषु शब्देषु जीवभूता विभाव्यते ।
सा महावागिति ज्ञेयं शब्दतत्वार्थवेदिभिः ॥

एकस्मिन्नेव बीजे तु षट्कर्माणि विभान्ति हि ।
फलवन्ति च तत्कर्मबीजं बीजेन रक्ष्यते ॥

ओं तत्सदिति निर्देशो दृश्यते ब्रह्मणि स्वयम् ।
एतन्महावाक्यवेत्ता प्राप्नोति परमं पदम् ॥

इति, ओं तत्सदित्यस्य महावाक्यत्वं तत्स्वभावश्चाभिवर्णितं भवति ।



ओमिति स्थानेऽहं पदमादाय अहं तत्सदिति महावाक्यानुसन्धानम् । तत्र तावदेवं बोधः—तदिति तु अहमेव, सदिति तु अहमेव, अहमहमेवेति त्रिविधोऽयं निर्देशः । सर्वोपरतौ त्वोमिति श्रूयते । "यस्मिन्विज्ञाते सर्वं विज्ञातं भवति" इति श्रुतेरेकविज्ञानस्य मुख्यत्वं समुपन्यस्तम् । तदनुरूपं हि भवति महावाक्यं सर्वेषां पदार्थानां सनातनसत्यवस्तुविज्ञानमूलैकत्वबोधकम् । तदुक्तं प्रणवार्णवे—

'' शृणु देवि प्रवक्ष्यामि महावाक्यार्थमुत्तमम् ।
विज्ञानाद्यस्य वै सर्वं ब्रह्मेति परिबुध्यते ॥

ब्रह्मशक्त्या च यत्सृष्टं गुप्तं चैव समाहृतम् ।
तत्र सर्वत्र तद्ब्रह्मस्वरूपं त्वपरं भवेत् ॥

तच्च ब्रह्म जगद्बीजं ह्यात्मानात्मकळेबरम् ।
महच्छब्देन कथितं भवेदध्यात्मकोविदे ॥

बृहन्महच्छब्दयोश्च शक्तिरेका विभाव्यते ।
ब्रह्मणश्च महत्वं तु बृंहणे सति जायते ॥

तस्मान्महत्वं कार्यं स्यात्कारणं बृंहणं भवेत् ।
तस्मिन्ब्रह्मणि चैक्यं हि कार्यकारणभावयोः ॥

विज्ञायते विशेषेण सिद्धराजनिषेविते ।
कार्यं ब्रह्म कारणं च ब्रह्मेति कवयो विदुः ॥

तस्माद्ब्रह्म जगद्बीजं महच्छब्देन चोच्यते ।
त्रयाणां चैव लोकानां लयस्तत्रैव गीयते ॥

वाक्यं गुणत्रयोपेतपदसङ्घातमुच्यते ।
सन्निधिर्योग्यता चैवमाकांक्षा च त्रयश्च ते ॥

गुणा इति हि विज्ञेयमेते सन्ति यथाक्रमम् ।
आत्मनि चानात्मनि च ब्रह्मण्येवं च सुन्दरि ॥

महद्वाक्यशब्दयोस्तु समस्तत्वे सतीश्वरि ।
महावाक्यं च यच्च स्याद्ब्रह्मवाक्यं तदुच्यते ॥

कोऽयमात्मा भवेत्केयं प्रकृतिर्ब्रह्म किं च तत् ।
किं च प्रयोजनं तेषां त्रयाणां सति संभवे ॥

इति श्रुतिभिरध्याभिर्विचार्य च मुहुर्मुहुः ।
तेषां त्रयाणामेकत्वं सत्यं चैव सनातनम् ॥

येन वै ज्ञायते तच्च महावाक्यं भवेत्प्रिये ।
सर्वेषां च पदार्थानामेकत्वं तेन बुध्यते ॥

ओमित्येकाक्षराद्यस्मात्तच्च वै जायते प्रिये ।
तस्मान्महावाक्यबुद्धं त्रित्वैकत्वं विभाव्यते ॥

यस्मिंश्चैव परिज्ञाते सर्वं ज्ञातं च तद्भवेत् ।
सर्वं ब्रह्मेति विज्ञानं चैकविज्ञानमेव तत् ॥



तस्मात्तदेकविज्ञानं महावाक्याच्च जायते ।
सनातनं सर्वमूलममृतप्रदमेव तत् ॥

कर्ता ब्रह्म क्रिया ब्रह्म करणं ब्रह्मसंज्ञकम् ।
इति स्यादेकविज्ञानं जायते हि महात्मनाम् ॥

सर्वं ब्रह्मेति यो वेत्ति परप्रेप्सुश्च भामिनि ।
महात्मनश्च तस्यैव नैव कार्यं तु विद्यते ॥

तस्मान्मुख्यप्रकारश्च संसारे यः प्रदृश्यते ।
स्यात्तस्य बोधकं वाक्यं महावाक्यमिति श्रुतम् ॥

सोऽयं मुख्यप्रकारश्च सर्वलोकैकसंस्तुते ।
ब्रह्मभाव इति ज्ञेयं ब्रह्मजिज्ञासुभिः परम् ॥

महावाच इदं चेति महावाक्यमिति प्रिये ।
कैश्चिन्महर्षिभिः प्रोक्तं ग्राह्यं तदपि शोभने ॥

संसारिणां च सर्वेषां प्रत्येकं च विशेषतः ।
सत्यविज्ञानसिध्यर्थं प्रतिवेदं सुरेश्वरि ॥

ब्रह्मविष्णुशिवैश्चैव वेदकर्तृभिरंबिके ।
प्रतिवेदं भवेद्युक्तं तच्च ज्ञेयं मुमुक्षुभिः ॥

महावाक्यान्यनन्तानि यथासंसारमेव हि ।
भवन्ति तत्परिज्ञाता परब्रह्माप्यश्नुते ॥

यस्माद्ब्रह्मणि सर्वं वै महावाक्येन पश्यति ।
तस्मान्महावाक्यवेत्ता ब्रह्मविच्चेति बुध्यताम् ॥

यथैव हि महावाक्यं प्रणवोद्भूतमुच्यते ।
तथैव हि निगद्यन्ते गायत्रीति महर्षिभिः ॥

परो ब्रह्मवाचकश्च प्रणवोऽपि महेश्वरि ।
अवस्थामपरां प्राप्तो व्यष्टिभावं समश्नुते ॥

तस्मिन्नात्मा तथाऽनात्मा ब्रह्म चेति हि बुध्यते ।
व्यष्टिभावे पर्यायाश्च विद्यायास्तु सरस्वति ॥

अकारेण ह्युकारेण मकारेण यथाक्रमम् ।
आत्मानात्मा तथा ब्रह्म बुध्यते कार्यदर्शनात् ॥

विना कार्यपरिज्ञानं त्रयाणां वचनादिह ।
बुध्यते च न कोऽप्यर्थः परप्राप्तेश्च कारणम् ॥

संसार एव कार्यं स्यात्स च ज्ञेयो मुमुक्षुभिः ।
तेषां त्रयाणां संयोगवियोगाभ्यां महेश्वरि ॥

दिव्यसङ्कल्पसिद्धाभ्यां शुद्धाभ्यां च विशेषतः ।
चतुर्विधोऽस्ति संसारः सेश्वरश्चैव सक्रमः ॥

तत्सामान्यप्रकारश्च गायत्र्या ह्यवगम्यते ।
अत एव हि गायत्री स्तूयते श्रुतिभिः प्रिये ॥



सा स्यादेकपदी चेति द्विपदी त्रिपदीति च ।
चतुष्पदीति पादानां तत्त्वमूलाः सनातनाः ॥

धर्माश्च कथिताः सन्ति वेदास्ते च मुमुक्षुभिः ।
आत्मसन्निहितान्येव तत्त्वानि परमेश्वरि ॥

व्याख्याति सैव गायत्री तत्त्वमाता स्वभावतः ।
सर्वाभिः श्रुतिभिश्चेयं बहुधा कथ्यतेऽनघे ॥

स्वस्वरूपस्वभावाभ्यां कथितः परमेश्वरि ।
महावाक्यस्य गायत्र्याश्चैवं भेदश्च शाश्वतः ॥

ओङ्कारश्च महावाक्यगायत्रीभ्यां समन्वितः ।
शास्ति संसारकार्याणि सर्वांश्चैवाधिकारिणः ॥

सोऽयं विना महावाक्यगायत्रीभ्यां वरानने ।
आकाङ्क्षाव्यतिरेकाद्धि न स्यादर्थावबोधकः ॥

गायत्री च महावाक्यमोङ्कारस्य स्वभावतः ।
शारीरं रूपमेवास्तीत्याहुर्वै श्रुतयोऽनघे ॥

मयि ब्रह्मणि विष्णौ च नियुक्ते परमात्मना ।
कर्तव्यस्य च कार्यस्य निश्चयाय महेश्वरि ॥

ध्यानं सत्यास्थितेऽस्माकं शुद्धचिद्व्योममण्डले ।
कोशे च समुदेत्येकः शब्दो ह्योङ्कारसंज्ञकः ॥

चिन्त्यमाने पुमस्तस्मिन्किमेतदिति भावतः ।
प्रकाशन्ते ह्यक्षराणि त्रीणि योगावृतानि च ॥

तेभ्यश्चाविर्भवत्येव गायत्री च चतुष्पदा ।
महावाक्यं च ताभ्यां तु संभवन्त्यखिलागमाः ॥

तस्मादेव महेशानि छन्दसामृषभः स्वयम् ।
महावाक्येन गायत्र्या चान्वितोऽर्थावबोधकः ॥

भवेत्तेन वयं सर्वे कार्यं सांसारिकं पुनः ।
विनिश्चित्य यथाकाममधिकारं स्वमास्थिताः ॥

भवामः कार्यकर्तारो यथाकालं परेरिताः ।
महावाक्येन गायत्र्या चोक्ता सर्वसमाश्रया ॥

स्यान्निवृत्तिः प्रवृत्तिश्च ब्रह्मनिष्ठा सुरेश्वरि ।
संसारेषु च सर्वेषु चतुर्षु कमलानने ॥

प्रथमाश्च त्रयः सन्ति प्रवृत्त्या ह्युपलक्षिताः ।
संसारो यस्तुरीयः स्यात्स निवृत्तिपरो भवेत् ॥

प्रवृत्त्या ज्ञायते सर्वं जगच्च त्रितयात्मकम् ।
नानाविभूतिमच्चैव नानास्थानं च सेश्वरम् ॥

कर्मभक्तिज्ञानभावं सागमं चैव सक्रमम् ।
उच्चावचविकारं च साण्डस्वेदजरायुजम् ॥



यच्च सर्वगतं वस्तु परमार्थं परायणम् ।
शरणं सर्वभूतानां जगज्जन्मादिकारणम् ॥

कालस्वरूपं शान्तं च तन्निवृत्त्योपलभ्यते ।
सा प्रवृत्तिर्निवृत्तिश्च संसारनियते ह्युभे ॥

परे ब्रह्मणि तस्मिंश्च त एते भवतः स्वतः ।
किंच ब्रह्मणि तस्मिंश्च स्वभावः परिबुध्यते ॥

तृतीयो यो विशुद्धश्च स च योगेन बुध्यते ।
समष्टिभावसिद्धेन शुद्धदृष्टिमता च हि ॥

निवृत्तेश्चैव योगत्वं केचित्प्राहुर्महर्षयः ।
तत्त्वतस्तु निवृत्तिः सा भवेद्योगस्य कारणम् ॥

पूर्वसंबन्धनाशाद्धि परयोगश्च सिध्यति ।
परयोगे च सर्वेषां स्वभावः परमो भवेत् ॥

प्रवृत्तानां च सर्वेषां फलसाम्यस्य सिद्धये ।
निवृत्तिश्चैव विज्ञेया ह्यस्ति सिद्धनिषेविते ॥

आत्मानात्मदर्शनेन त एते ब्रह्मणि स्थिते ।
शुद्धदृष्ट्या तु योगश्च तस्मिन्ब्रह्मणि शाश्वतः ॥

प्रवृत्तिश्च निवृत्तिश्च योगश्चैव सुरेश्वरि ।
स्वभावो ब्रह्मणश्चेति विज्ञेयं स्यान्मुमुक्षुभिः ॥

चिन्त्यमाने पुमंस्तस्मिन्किमेतदिति भावतः ।
प्रकाशन्ते ह्यक्षराणि त्रीणि योगावृतानि च ॥

तेभ्यश्चाविर्भवत्येव गायत्री च चतुष्पदा ।
महावाक्यं च ताभ्यां तु संभवन्त्यखिलागमाः ॥

तस्मादेव महेशानि छन्दसामृषभः स्वयम् ।
महावाक्येन गायत्र्या चान्वितोऽर्थावबोधकः ॥

भवेत्तेन वयं सर्वे कार्यं सांसारिकं पुनः ।
विनिश्चित्य यथाकाममधिकारं स्वमास्थिताः ॥

भवामः कार्यकर्तारो यथाकालं परेरिताः ।
महावाक्येन गायत्र्या चोक्ता सर्वसमाश्रया ॥

स्यान्निवृत्तिः प्रवृत्तिश्च ब्रह्मनिष्ठा सुरेश्वरि ।
संसारेषु च सर्वेषु चतुर्षु कमलानने ॥

प्रथमाश्च त्रयः सन्ति प्रवृत्त्या ह्युपलक्षिताः ।
संसारो यस्तुरीयः स्यात्स निवृत्तिपरो भवेत् ॥

प्रवृत्त्या ज्ञायते सर्वं जगच्च त्रितयात्मकम् ।
नानाविभूतिमच्चैव नानास्थानं च सेश्वरम् ॥

कर्मभक्तिज्ञानभावं सागमं चैव सक्रमम् ।
उच्चावचविकारं च साण्डस्वेदजरायुजम् ॥



यच्च सर्वगतं वस्तु परमार्थं परायणम् ।
शरणं सर्वभूतानां जगज्जन्मादिकारणम् ॥

कालस्वरूपं शान्तं च तन्निवृत्त्योपलभ्यते ।
सा प्रवृत्तिर्निवृत्तिश्च संसारनियते ह्युभे ॥

परे ब्रह्मणि तस्मिंश्च त एते भवतः स्वतः ।
किंच ब्रह्मणि तस्मिंश्च स्वभावः परिबुध्यते ॥

तृतीयो यो विशुद्धश्च स च योगेन बुध्यते ।
समष्टिभावसिद्धेन शुद्धदृष्टिमता च हि ॥

निवृत्तेश्चैव योगत्वं केचित्प्राहुर्महर्षयः ।
तत्त्वतस्तु निवृत्तिः सा भवेद्योगस्य कारणम् ॥

पूर्वसंबन्धनाशाद्धि परयोगश्च सिध्यति ।
परयोगे च सर्वेषां स्वभावः परमो भवेत् ॥

प्रवृत्तानां च सर्वेषां फलसाम्यस्य सिद्धये ।
निवृत्तिश्चैव विज्ञेया ह्यस्ति सिद्धनिषेविते ॥

आत्मानात्मदर्शनेन त एते ब्रह्मणि स्थिते ।
शुद्धदृष्ट्या तु योगश्च तस्मिन्ब्रह्मणि शाश्वतः ॥

प्रवृत्तिश्च निवृत्तिश्च योगश्चैव सुरेश्वरि ।
स्वभावो ब्रह्मणश्चेति विज्ञेयं स्यान्मुमुक्षुभिः ॥

तस्मात्तदनुसृत्यैव लोके स्युरखिलागमाः ।
यथाकालं च तान्प्राप्य सर्वे चैवाधिकारिणः ॥

आवश्यकमिदं कार्यमित्थं सर्वं तथा पुनः ।
इत्थं ह्यनावश्यकं च तदिदं चेति निश्चयात् ॥

सर्वं संसारकार्यं च निर्णयन्ति स्वयोगतः ।
निर्णयादेव तस्माद्धि संसारश्चैव चेष्टते ॥

आगमानां च सर्वेषां महावाक्यं पिता भवेत् ।
संसारमुख्यधर्मस्य बोधकत्वान्महेश्वरि ॥

भवसामान्यसर्वस्य बोधकत्वाद्वरानने ।
भवेन्माता च गायत्री तदुभे स्तः सनातने ॥

ओमित्येकाक्षरं ब्रह्म लक्षणं सर्वभावगम् ।
महावाक्येन गायत्र्या युक्तं शुद्धा ह्युपासते ॥"

इति । तस्मादेव तादृशप्रभावमहावाक्यविशिष्टप्रणवव्याख्यानपरत्वे-नास्य प्रणववादस्याधिकार्युपादेयत्वं सिद्धमित्यलं विस्तरेण ।

॥ इति प्रणववादविमर्शे ॥
॥ प्रथमगुच्छः ॥

---

ॐ

# ॥ अथ द्वितीयगुच्छः ॥

शास्त्रेऽस्मिंश्च महर्षिः प्रथमप्रकरणे द्वितीयतरङ्गे च प्रथमं प्रणवस्य सर्वार्थबोधकत्वमकारोकारमकारात्मकत्वम्, तत्र च क्रमाख्यानेनाकारस्य पूर्वं व्याख्येयत्वं च प्रतिपाद्य "अकारो-ऽयमीश्वरः यश्चात्मत्वेनात्रावबुद्धः । नास्य विकारित्वम्, एतदाश्रयं सर्वम्, सर्वाश्रयोऽयमपीति सिद्धम्" इत्यकाराक्षरार्थं च पूर्वं संग्रहेणाह । यश्च संसारे तथा च देहेष्वस्माकमात्मेति बुध्यते, स चेश्वरोऽकाराक्षरवाच्यो भवति, स च न स्वयं विकारवान्, सर्वं च तदात्माश्रयम्, सोऽयमात्मा च सर्वाश्रयः इति तद्वाक्यार्थः । यच्चात्मनः सर्वशरीरान्तःप्रविष्टत्वं सर्वेश्वरत्वमविकारित्वं सर्वस्यात्मा-श्रयत्वमात्मनः सर्वाश्रयत्वं च, तच्च सर्वं श्रीमद्भगवद्गीतायामित्थं सम्यक्प्रतिपादितं भवति । यथा—

"अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥
उपद्रष्टानुमन्ता च कर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मयया ॥

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेनं विदित्वैनं नानुशोचितुमर्हसि ॥"

इति । एवं महाभारते शान्तिपर्वणि पञ्चाशीत्यधिकतमेऽध्याये—

"आत्मानं तं विजानीहि सर्वलोकविपाचकम् ।
स तस्मिन्संश्रितो देहे ह्यब्बिन्दुरिव पुष्करे ॥
क्षेत्रज्ञं तं विजानीहि नित्यं लोकहितात्मकम् ।
तमो रजश्च सत्त्वं च विद्धि जीवगुणानिमान् ॥"

इत्युक्तम् । अनेन चात्मनः सर्वलोकव्यवसायप्रवर्तकत्वेन सर्वेश्वरत्वं सर्वदेहभाक्त्वं देहसंबन्धप्रयुक्तविकारानाश्रयत्वं गुणाविष्टत्वेन जीवशब्दवाच्यत्वं चाभिवर्णितं भवति । एवमेव तस्य ह्यवस्थाभेदेन नामभेदः स्वरूपं च तत्रैवमुक्तम्—

"आत्मा क्षेत्रज्ञ इत्युक्तो संयुक्तः प्राकृतैर्गुणैः ।
तैरेव तु विनिर्मुक्तः परमात्मेत्युदाहृतः ॥"

इति । अनेन पञ्चभूताद्यात्मकेष्वस्माकं देहेषु वसतश्चात्मन एव ब्रह्मस्वरूपपुरुषस्वरूपत्वं सर्वमूर्तद्रव्यसंयोगित्वं सर्वेश्वरत्वं चाभिवर्णितं भवति । एवं भागवते तृतीयस्कन्धे षड्विंशाध्याये च—

"अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ।
प्रत्यग्धामा स्वयं ज्योतिर्विश्वं येन समन्वितम् ॥



न जायते न म्रियते सहदेहाद्युपाधिभिः ।
निमित्तैरात्ततद्धर्मो यथा स्वप्ने तदीक्षया ॥

इति, तदात्मस्वरूपमुक्तं भवति । अत्र चात्मनो ह्यनादित्वं सत्त्वादिगुणानन्वितत्वं देहविलक्षणत्वं स्वपरप्रकाशकत्वं निरतिशयसूक्ष्मरूपत्वमविकारित्वं सङ्गराहित्यं चोक्तं भवति । एवं श्री विष्णुपुराणे द्वितीयांशे च त्रयोदशेऽध्याये—

"आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ।
प्रवृद्ध्युपचयौ नास्य चैकस्याखिलजन्तुषु ॥"

इति तदात्मस्वरूपमभिवर्णितं भवति । एवं बृहदारण्यकोपनिषदि—२, ५, १

"यश्चाऽयमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो
यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषः ।
अयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम् ॥

इति, तथा "इहैवान्तश्शरीरे सोम्य सपुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्ति" इति प्रश्नोपनिषदि ६, २, १, एवमन्याभिश्चोपनिषद्भिश्च ब्रह्मरूपस्य तदात्मनः देवमनुष्यादिसर्वशरीरान्तः प्रविष्टत्वं कर्तव्याकर्तव्यशास्तृत्वमविकारित्वं सर्वव्यापकत्वं सर्वेश्वरत्वं च सम्यङ्निरूपितं भवति । अत्रेदमवधेयम्—महर्षिरयमत्र ह्यकारस्य "अकारो वै सर्वा वाक्" इत्यादिश्रुतिसिद्धस्य शब्दस्वरूपप्रयुक्तस्य च महिम्नः समभिवर्णनेन तदकारवाच्यात्म-

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेनं विदित्वैनं नानुशोचितुमर्हसि ॥"

इति । एवं महाभारते शान्तिपर्वणि पञ्चाशीत्यधिकतमेऽध्याये—

"आत्मानं तं विजानीहि सर्वलोकविपाचकम् ।
स तस्मिन्संश्रितो देहे ह्यब्बिन्दुरिव पुष्करे ॥
क्षेत्रज्ञं तं विजानीहि नित्यं लोकहितात्मकम् ।
तमो रजश्च सत्त्वं च विद्धि जीवगुणानिमान् ॥"

इत्युक्तम् । अनेन चात्मनः सर्वलोकव्यवसायप्रवर्तकत्वेन सर्वेश्वरत्वं सर्वदेहभाक्त्वं देहसंबन्धप्रयुक्तविकारानाश्रयत्वं गुणाविष्टत्वेन जीवशब्दवाच्यत्वं चाभिवर्णितं भवति । एवमेव तस्य ह्यवस्थाभेदेन नामभेदः स्वरूपं च तत्रैवमुक्तम्—

"आत्मा क्षेत्रज्ञ इत्युक्तो संयुक्तः प्राकृतैर्गुणैः ।
तैरेव तु विनिर्मुक्तः परमात्मेत्युदाहृतः ॥"

इति । अनेन पञ्चभूताद्यात्मकेष्वस्माकं देहेषु वसतश्चात्मन एव ब्रह्मस्वरूपपुरुषस्वरूपत्वं सर्वमूर्तद्रव्यसंयोगित्वं सर्वेश्वरत्वं चाभिवर्णितं भवति । एवं भागवते तृतीयस्कन्धे षड्विंशाध्याये च—

"अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ।
प्रत्यग्धामा स्वयं ज्योतिर्विश्वं येन समन्वितम् ॥



न जायते न म्रियते सहदेहाद्युपाधिभिः ।
निमित्तैरात्ततद्धर्मो यथा स्वप्ने तदीक्षया ॥

इति, तदात्मस्वरूपमुक्तं भवति । अत्र चात्मनो ह्यनादित्वं सत्त्वादिगुणानन्वितत्वं देहविलक्षणत्वं स्वपरप्रकाशकत्वं निरतिशयसूक्ष्मरूपत्वमविकारित्वं सङ्गराहित्यं चोक्तं भवति । एवं श्री विष्णुपुराणे द्वितीयांशे च त्रयोदशेऽध्याये—

"आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ।
प्रवृद्ध्युपचयौ नास्य चैकस्याखिलजन्तुषु ॥"

इति तदात्मस्वरूपमभिवर्णितं भवति । एवं बृहदारण्यकोपनिषदि—२, ५, १

"यश्चाऽयमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो
यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषः ।
अयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम् ॥

इति, तथा "इहैवान्तश्शरीरे सोम्य सपुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्ति" इति प्रश्नोपनिषदि ६, २, १, एवमन्याभिश्चोपनिषद्भिश्च ब्रह्मरूपस्य तदात्मनः देवमनुष्यादिसर्वशरीरान्तःप्रविष्टत्वं कर्तव्याकर्तव्यशास्तृत्वमविकारित्वं सर्वव्यापकत्वं सर्वेश्वरत्वं च सम्यङ्निरूपितं भवति । अत्रेदमवधेयम्—महर्षिरयमत्र ह्यकारस्य "अकारो वै सर्वा वाक्" इत्यादिश्रुतिसिद्धस्य शब्दस्वरूपप्रयुक्तस्य च महिम्नः समभिवर्णनेन तदकारवाच्यात्म-

स्वरूपमभिवर्णयतीति । अत एव "कारणभूतश्चायं सर्वशब्दानाम्" अविज्ञेयं हि तदकारस्वरूपम्" अकारस्वरूपं हि सर्वोपाधिकम्, नित्यमनाद्यनन्तं सत्यं सत्यभूतं च भवति" अकारश्चायं निस्सन्धिकः, न च शब्दः, न च प्रातिपदिकत्वादिधर्मवांश्च भवति" आत्मनो ब्रह्मणश्चाकारेण प्रवचनं भवति" इत्यादि वाक्यैश्च तदकारगौरवं तदकारस्य चात्मनो ब्रह्मणश्च वाचकत्वं च व्याचख्यौ । अभ्युपगतश्च महर्षिणात्र वाच्यवाचकयोरभेदः । तथा च महर्षिणात्र, तदात्मा निर्विकारः निराश्रयः इत्यादिभिरभिवर्णितो भवति । तद्वर्णनं सर्वमपीत्थं श्रीयोगानन्दविरचितप्रणववादार्थदीपिका प्रथमाध्याये—

"आत्मनश्च ह्यकारस्य गौणं तादात्म्यमुच्यते ।
यथात्मा तु स्वयंभूश्च निर्विकारो निराश्रयः ॥
सर्वाश्रयो निर्व्यपेक्षश्चाविज्ञेयः सनातनः ।
सर्वोपाधिस्वरूपश्च नित्योऽनाद्यन्तरूपवान् ॥
वर्णसंख्याक्रमकालरहितः शुद्ध एव सः ।
उपस्थितश्च सर्वत्र चानुपस्थितमूर्तिमान् ॥
ज्ञानाज्ञानस्वरूपश्च विभुः कर्ता परः प्रभुः ।
निर्मलः परिबद्धोऽपि सत्तारूपः स भासते ॥
अणोरणीयान्महतो महीयान्स्यादवस्थया ।
अपूर्णः प्रकृतेर्योगात्स्वयं पूर्णः प्रकाशते ॥



सर्वज्ञश्च स्वयं ब्रह्म प्रकृतिस्थः पुमान्परः ।
तथा तद्वाचकोऽकारो बोध्यो भवति योगिभिः ॥
स चाकारो हि सर्वा वागिति श्रुतिभिरुच्यते ।
तरङ्गे च द्वितीयेऽस्मिन्नेवमात्मा निरूपितः ॥"

इति दृश्यते । अत्र च यदुक्तमात्मनः स्वयंभूत्वादिविशेषणम्, तत्सर्वमपि श्रुतिस्मृतीतिहासपुराणादिभिः स्पष्टमवगम्यते । "अयमात्मा ब्रह्म" इति बृहदारण्यक २, ६ श्रुत्या सर्वदेहान्तर्वर्तिनश्चात्मनो ब्रह्मस्वरूपत्वप्रतिपादनाद्यच्च वा स्वयंभूत्वादिविशेषणमन्यद्वा, तत्सर्वमप्यात्मनो युक्तमेवेति विज्ञेयम् । ततश्च "पराञ्चि खानि व्यतृणत्स्वयंभूः" अणोरणीयान्महतो महीयान्" अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्" इति कठोपनिषदा, तथा "न जायते न म्रियते न शुष्यति न क्लिद्यते न दह्यते न कम्पते न भिद्यते न च्छिद्यते निर्गुणः साक्षिभूतः शुद्धो निरवयवात्मा केवलः सूक्ष्मो निर्ममो निरञ्जनो निर्विकारः शब्दस्पर्शरूपरसगन्धवर्जितो निर्विकल्पो निराकाङ्क्षः सर्वव्यापी सोऽचिन्त्यो निर्वर्ण्यश्च पुनात्यशुद्धान्यपूतानि" इत्यात्मोपनिषदा च तदात्मनः, स्वयंभूत्वं सर्वाश्रयत्वमणुत्वं महत्वं निर्विकारत्वं निराश्रयत्वं निर्व्यपेक्षत्वमविज्ञेयत्वं सनातनत्वं च सिध्यति । एवम्—

"सर्वतः पाणिपादं च सर्वतोऽक्षिशिरोरुहम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥

बहिरन्तश्च भूतानां चरं चाचरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥

अविभक्तं विभक्तेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च विज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥"

इति श्रीभगवद्गीतावचनेनाभिवर्णितं भवति स्वरूपमात्मनश्च सर्वोपास्यम् । अत्रेदमवधेयम्—"आत्मावारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" [बृ. २, ४, ५] "आत्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्वमिति" छान्दोग्य ७, २५, २. एवम्—

"आदिः स संयोगनिमित्तहेतुः
परस्त्रिकालादकलोऽपि दृष्टः ।
तं विश्वरूपं भवभूतमीड्यं
देवं स्वचित्तस्थमुपास्य पूर्वम् ॥

स वृक्षकालाकृतिभिः परोऽन्यो
यस्मात्प्रपञ्चः परिवर्ततेऽयम् ।



धर्मावहं पापनुदं भगेशं
ज्ञात्वात्मस्थममृतं विश्वधाम ॥

तमीश्वराणां परमं महेश्वरं
तं देवतानां परमं च दैवतम् ।
पतिं पतीनां परमं परस्ता-
द्विदाम देवं भुवनेशमीड्यम् ॥

न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च ॥

न तस्य कश्चित्पतिरस्ति लोके
न चेशिता नैव च तस्य लिङ्गम् ।
स कारणं करणाधिपाधिपो
न चास्य कश्चिज्जनिता न चाधिपः ॥"

इति [श्वेत-६-अध्याये] एवं च "एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्" [माण्डूक्य १, ६] इत्यादि श्रुतिभ्यस्तदनुयायिभिश्च देहातिरिक्तात्मस्वरूपानुभवपरैः शास्त्रैः, यथाकालं यथादेशं च सनातनधर्मसंरक्षणार्थमवतीर्णानां भगवदंशभूतानां च महाचार्याणां गुरूणां सदुपदेशेन

च, अस्ति कश्चिदात्मा देहातिरिक्तः साक्षी तत्तद्देहधारकश्च ब्रह्मस्वरूप इति विज्ञायते । एवम्—

“अनादिरात्मा कथितस्तस्यादिस्तु शरीरकम् ।
आत्मनस्तु जगत्सर्वं जगतश्चात्मसंभवः ॥

मोहजालमपास्येह पुरुषो दृश्यते हि सः ।
सहस्रकरपन्नेत्रः सूर्यवर्चाः सहस्रकः ॥

स आत्मा चैव यज्ञश्च विश्वरूपः प्रजापतिः ।
विराजः सोऽन्नरूपेण यज्ञत्वमुपगच्छति ॥

अनादिरात्मसंभूतिर्विद्यते नान्तरात्मनः ।
समवायीति पुरुषो मोहेच्छाद्वेषकर्मजः ॥

अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम् ।
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत्प्रभुः ॥”

इति याज्ञवल्क्यस्मृतौ प्रायश्चित्ताध्याये चतुर्थप्रकरणे च तदात्मस्वरूपमभिहितं भवति । अत्र तु बार्हस्पता भूतचतुष्टयवादिनो लोकयतिकाश्च चार्वाकाः—मनुष्योऽहं जानामि, इति शरीरस्याहं प्रत्ययालंबनत्वेन ज्ञानाश्रयत्वेन चावगम्यमानत्वाच्छरीरमेवात्मा, देहातिरिक्तात्मनि प्रमाणाभावात्, प्रत्यक्षैकप्रमाणवादितया चानुमानादेरनङ्गीकाराच्च । मम हेह इति भेदस्त्वौपचारिकः, इति वदन्ति । तदुक्तम्—



“अत्र चत्वारि भूतानि भूमिवार्यनलानिलाः ।
चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते ॥

किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत् ।
अहं स्थूलः कृशोऽस्मीति सामानाधिकरण्यतः ॥

देहः स्थौल्यादियोगाच्च स एवात्मा न चापरः ।
मम देहोऽयमित्युक्तिः संभवेदौपचारिकी ॥”

इति सर्वदर्शनसंग्रहे । एवं विधेषु नास्तिकेषु भूतपञ्चकवादिनोऽपि भवन्ति । तदुक्तम्—

“चतुर्णामथ पञ्चानां भूतानां वै स्वभावतः ।
सति योगे हि चैतन्यं विजातीयं प्रजायते ॥

वियोगे सति भूतानां नश्यत्येव तदञ्जसा ।
स्वर्गश्च नरकं चैव सुखं दुःखमिति क्रमात् ॥

प्रोच्यते साधु चार्वाकैः प्रत्यक्षशरणैः पुनः ।
पुरुषार्थावर्थकामौ द्वावेवेति हि तन्मतम् ॥

तच्चैतन्यसंप्रयुक्तो देहश्चात्मेति कथ्यते ।
कश्चिद्देहातिरिक्तश्च सोऽयमात्मा न विद्यते ॥”

इति तन्मतं गोभिलेन भारतार्थकारिकायाम् । एवं देहातिरिक्तात्मभावमनभ्युपगच्छतो नास्तिकान्प्रतीत्थमुक्तं याज्ञवल्क्येन—

"वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च ।
आर्त्या गत्या तथाऽगत्या सत्येन ह्यनृतेन च ॥

श्रेयसा सुखदुःखाभ्यां कर्मभिश्च शुभाशुभैः ।
निमित्तशाकुनज्ञानग्रहसंयोगजैः फलैः ॥

तारानक्षत्रसञ्चारैर्जागरैः स्वप्नजैरपि ।
आकाशपवनज्योतिर्जलभूतिमिरैस्तथा ॥

मन्वन्तरैर्युगप्राप्त्या मन्त्रौषधिफलैरपि ।
वित्तात्मानं वेद्यमानं कारणं जगतस्तथा ॥

अहंकारः स्मृतिर्मेधा द्वेषो बुद्धिः सुखं धृतिः ।
इन्द्रियान्तरसञ्चार इच्छा धारणजीविते ॥

स्वर्गः स्वप्नश्च भावानां प्रेरणान्मनसो गतिः ।
निमेषश्चेतनायन्त्र आदानं पाञ्चभौतिकम् ॥

यत एतानि दृश्यन्ते लिङ्गानि परमात्मनः ।'
तस्मादस्तिपरो देहादात्मा सर्वग ईश्वरः ॥"

इति प्रायश्चित्ताध्याये चतुर्थप्रकरणे । तदेवं व्याख्यातं भवति विज्ञानेश्वरेण—वेदैः, स एव नेति नेतीत्यात्मेति, अस्थूलमनण्वह्रस्वमपाणिपादमित्यादिभिः । शास्त्रैश्च, मीमांसान्वीक्षक्यादिभिः । विज्ञानैश्च, ममेदं शरीरमित्यादिदेहव्यतिरिक्तात्मानुभवैः । तथा जन्ममरणाभ्यां जन्मान्तरानुष्ठितधर्माधर्मनियताभ्यां देहातिरिक्ता-



त्मानुमानम् । आर्त्या, जन्मान्तरगतकर्मानुष्ठाननियतया । तथा गमनागमनाभ्यां ज्ञानेच्छाप्रयत्नाधारनियताभ्यामपि भौतिकदेहातिरिक्तात्मानुमानम् । न हि देहस्य चैतन्यादि संभवति । यतः कारणगुणप्रक्रमेण कार्यद्रव्ये वैशेषिकगुणारंभो दृष्टः । न च तत्कारणभूतपार्थिवपरमाण्वादिषु चैतन्यादिसमवायः संभवति ; तदारब्धस्तंभकुंभादिभौतिकेष्वनुपलंभात् । न च मदशक्तिवदुदकादिद्रव्यान्तरसंयोगज इति वाच्यम्, शक्तेः साधारणगुणत्वात् । अतो भौतिकदेहातिरिक्तचैतन्यादिसमवाय्यङ्गीकर्तव्यः । सत्यानृते प्रसिद्धे । श्रेयो हितप्राप्तिः । सुखदुःखे आमुष्मिके । तथा शुभकर्मानुष्ठानमशुभकर्मपरित्यागः, एतैश्च ज्ञाननियतैर्देहातिरिक्तात्मानुमानम् । निमित्तं भूकंपादि । शाकुनं ज्ञानं पिङ्गळादिपतत्रिचेष्टालिङ्गकं ज्ञानम् । ग्रहाः सूर्यादयः, तत्संयोगजैः फलैः । तारा, अश्विन्यादिव्यतिरिक्तानि ज्योतींषि, नक्षत्राण्याश्वयुक्प्रभृतीनि, एतेषां सञ्चारैः शुभाशुभफलद्योतनैः, जागरैर्जागरावस्थाजन्यैश्च सच्छिद्रादित्यादिदर्शनैः, तथा स्वप्नजैः खरवराहयुक्तरथारोहणादिज्ञानैः तथा आकाशाद्यैश्च जीवोपभोगार्थतया सृष्टैः, तथा मन्वन्तरप्राप्त्या युगान्तरप्राप्त्या देहेऽनुपपद्यमानतया, तथा मन्त्रौषधिफलैः प्रेक्षापूर्वकैः क्षुद्रकर्माद्यैः, साक्षात्परंपरया वा देहेऽनुपपद्यमानैर्वेद्यमानम्, हे मुनयो वित्त जानीत । किं च, अहङ्कृतिरहङ्कारः । स्मृतिः प्राग्भावीयानुभवभावितसंस्कारोद्बोधनिबन्धना

स्तन्यपानादिगोचरा। सुखमैहिकम्। धृतिर्धैर्यम्। इन्द्रियान्तरेण हि दृष्टेऽर्थे इन्द्रियान्तरस्य सञ्चारो यमहमद्राक्षं तमहं स्पृशामीत्येवमनुसन्धानरूप इन्द्रियान्तरसञ्चारः। अत्रेच्छाप्रयत्नचैतन्यानां स्वरूपेण लिङ्गत्वम्। पूर्वश्लोकेऽनुगमनसत्यवचनादिहेतुतया आर्थिकं लिङ्गत्वमित्यपौनरुक्त्यम्। धारणं शरीरस्य। जीवितं प्राणधारणम्। स्वर्गोऽनियतदेहान्तरोपभोग्यः सुखविशेषः स्वप्नः प्रसिद्धः। पूर्वश्लोके तु स्वप्नस्य शुभफलद्योतकतया लिङ्गत्वम्। अत्र स्वरूपेणेत्यपौनरुक्त्यम्। तथा भावानामिन्द्रियादीनां प्रेरणम्। मनसो गतिश्चेतनाधिष्ठानव्याप्ता। निमेषः प्रसिद्धः। तथा पञ्चभूतानामुपादानम्। यस्मादेतानि लिङ्गानि भूतेष्वनुपपन्नानि साक्षात्परंपरया वा परमात्मनो द्योतकानि दृश्यन्ते, तस्मादस्ति देहातिरिक्त आत्मा सर्वग ईश्वर इति प्रसिद्धमिति। एवं भूतसंघातातिरिक्तत्वमात्मनः—

"न पञ्च साधारणमत्र किं चि-
च्छरीरमेको वहतेऽन्तरात्मा।
स वेत्ति गन्धांश्च रसांच्छ्रुतीश्च
स्पर्शं च रूपं च गुणाश्च येऽन्ये॥

पञ्चात्मको पञ्चगुणप्रदर्शी
स सर्वगात्रानुगतोऽन्तरात्मा।



स वेत्ति दुःखानि सुखानि चात्र
तद्विप्रयोगात्तु न वेत्ति देही॥

सचेतनं जीवगुणं वदन्ति
स चेष्टते चेष्टयते च सर्वम्।
ततः परं क्षेत्रविदो वदन्ति
प्रावर्तयद्यो भुवनानि सप्त॥

न जीवनाशोऽस्ति हि देहभेदे
मिथ्यैतदाहुर्मृत इत्यबुद्धाः।
जीवस्तु देहान्तरितः प्रयाति
दशार्धतैवास्य शरीरभेदः॥

एवं सर्वेषु भूतेषु गूढश्चरति संवृतः।
दृश्यते त्वग्र्यया बुध्या सूक्ष्मया तत्वदर्शिभिः॥"

इति महाभारतशान्तिपर्वणि, १८६ अध्याये प्रतिपादितं भवति। अत्र चात्मनो देहातिरिक्तत्वं भोक्तृत्वं सर्वदेहवर्तित्वेन क्षेत्रज्ञसंज्ञाविशिष्टत्वं प्राकृतगुणाश्रयत्वेन जीवत्वं तद्गुणानाश्रयणेन परमात्मत्वं च निरूपितं भवति।

अन्ये पुनर्लोकायतिकमित्राणि चैवमाहुः—सत्यपि शरीरे चक्षुरादिभिर्विना रूपादिज्ञानाभावादिन्द्रियाण्येव चेतनानि, न चेन्द्रियाणां करणतया ज्ञानान्वयव्यतिरेकयोरन्यथासिद्धिः, तेषां

करणत्वकल्पनादुपादानकल्पनस्याभ्यर्हितत्वात् । अतश्चान्धोऽहं काणोऽहं मूकोऽहमित्यहंप्रत्ययालंबनानि चेतनानीन्द्रियाणि प्रत्येकमात्मत्वेनाभ्युपेयानि, शरीरे त्वहंप्रत्ययालंबनत्वं चेतनत्वं चात्मभूतेन्द्रियाश्रयत्वादन्यथासिद्धम् । नन्वेकस्मिंश्च शरीरे बहूनामिन्द्रियाणां चेतनत्वे, य एवाहं पूर्वं रूपमद्राक्षं स एवेदानीं संश्रृणोमीति प्रत्यभिज्ञा न स्यात्, तथा भोक्तृत्वं च रूपादिषु युगपदेव स्यान्न क्रमेणेति चेत्, मैवम् । न हि चेतनैकत्वं प्रत्यभिज्ञाक्रमभोगयोर्निमित्तम् , किं त्वेकशरीराश्रयत्वमेव । ततो यथैकस्मिंश्च गृहे बहूनां पुरुषाणामेकैकस्य विवाहेऽन्येषामुपसर्जनत्वं तथेन्द्रियात्मनामपि चैकैकस्योपभोगकालेऽन्येषामुपसर्जनत्वं विज्ञेयम् । तस्मादिन्द्रियाणामात्मत्वं सिद्धमिति ।

अन्ये त्वेवं ते मन्यन्ते—स्वप्नावस्थायां चक्षुरादीनामभावेऽपि केवलस्य च मनसो विज्ञानाश्रयत्वमहंप्रत्ययालंबनत्वं चोपपद्यते । न हि रूपादिविज्ञानानां चक्षुराद्याश्रयत्वम् , तथा सति केवले च मनसि रूपादिस्मृत्यनुपपत्तेः । ततः करणान्येव चक्षुरादीनि, अहं प्रत्ययस्तु तत्र केवलं कर्तृत्वोपचारात्सिध्यति । न चानेकात्मस्वेकशरीराश्रयत्वमात्रेण प्रत्यभिज्ञा युज्यते, एकप्रासादमाश्रितानामपि तत्प्रसङ्गात् । तस्माच्चक्षुरादिकरणकं शरीराद्याधारं च मन एवात्मेति । विज्ञानवादिनस्तु, क्षणिकविज्ञानव्यतिरिक्तवस्तुनः सद्भावमनुभवविरुद्धं मन्वानास्तस्यैव विज्ञानस्यात्मत्वमाहुः । प्रत्यभिज्ञानं तु ज्वालायामिव सन्ततविज्ञानोदयसादृस्यादुपपद्यते, विज्ञानानां हेतुफलसन्तानमात्रादेव कर्मज्ञानबन्धमोक्षादिसिद्धिरिति ।



माध्यमिकास्तु — सुषुप्तौ विज्ञानस्याप्यदर्शनाच्छून्यमेवात्मतत्त्वमित्याहुः, यदि सुषुप्तावपि विज्ञानप्रवाहः स्यात्तदा विषयावभासोऽपि प्रसज्येत । ननु निरालंबनज्ञानायोगाज्जाग्रत्स्वप्नज्ञानानामेव सालंबनत्वं न सौषुप्तिकज्ञानानामिति चेन्न; विशेषाभात् विमतं सालंबनं प्रत्ययत्वात्संमतवदिति । यद्युत्थितस्य सौषुप्तविषयस्मृत्यभावनियमान्न तत्र विषय इति चेत्, तर्हि तत्र नियमेनास्मर्यमाणत्वादेव ज्ञानमपि माभूत् । न च शून्ये विवदितव्यम्, यथा सविकल्पकः स्वविषयविपरीतनिर्विकल्पकजन्यस्तथा सत्प्रत्ययोऽपि स्वविपरीतशून्यजन्य इत्यभ्युपेयत्वात् । एवं चोत्थाने सति जायमानस्याहमस्मीति सत्प्रत्ययस्य समनन्तरपूर्वप्रत्ययलक्षणकारणरहितस्य वास्तवत्वायोगाच्छून्यमेव तत्त्वमिति । मीमांसकास्तु तदात्मनो देहादिव्यतिरेकं प्रतिपद्याऽपि तं संसारिणं कर्तारं भोक्तारं चेत्याहुः । सांख्यास्तु तदात्मनः कर्तृत्वं परित्यज्य भोक्तृत्वमेवामनन्ति । अस्ति तद्व्यतिरिक्तः सर्वज्ञः सर्वशक्त ईश्वर इति वैशेषिकयोगनैयायिकाः । इन्द्रियाणां मनसश्चात्मत्ववादिनां मतमसमञ्जसमिति, तदतिरिक्तत्वमात्मन इति—

"महाभूतानि सत्यानि यथात्मापि तथैव हि ।
कोऽन्यथैकेन नेत्रेण दृष्टमन्येन पश्यति ॥
वाचं वा को विजानाति पुनः संश्रुत्य संश्रुतम् ।
अतीतार्था स्मृतिः कस्य को वा स्वप्नस्य कारकः ॥
जातिरूपवयोवृत्तविद्यादिभिरहङ्कृतः ।
शब्दादिविषयोद्योगं कर्मणा मनसा गिरा ॥"

इति याज्ञवल्क्यस्मृतौ तृतीयाध्याये चतुर्थप्रकरणे कथितम् । अत्र हि, यथा हि पृथिव्यादिमहाभूतानि सत्यानि प्रमाणगम्यत्वात्, तथात्मापि सत्यः । अन्यथा यदि बुद्धीन्द्रियव्यतिरिक्तो ज्ञाता ध्रुवो न स्यात्, तर्हि एकेन चक्षुरिन्द्रियेण दृष्टं वस्तु अन्येन स्पर्शनेन्द्रियेण को वा विजानाति, यमहमद्राक्षं तमहं स्पृशामीति । तथा कस्य चित्पुरुषस्य वाचं पूर्वं श्रुत्वा पुनः श्रूयमाणां वाचम्, तस्य वागियमिति कः प्रत्यभिजानाति । तस्माज्ज्ञानेन्द्रियातिरिक्तो ज्ञाता ध्रुव इति सिद्धम् । किं च, यद्यात्मा ध्रुवो न स्यात्तर्ह्यनुभूतपदार्थगोचरा स्मृतिः पूर्वानुभवभावितसंस्कारोद्बोधनिबन्धना कस्य भवेत् । न ह्यनेन दृष्टे वस्तुनि अन्यस्य स्मृतिरुपपद्यते । तथा कः स्वप्नज्ञानस्य कारकः, न हीन्द्रियाणामुपरतव्यापाराणां तत्कारकत्वम् । तथा, अहमेवाभिजनत्वादिसंपन्नः, इत्येवं विधोऽनुसन्धानप्रत्ययः कस्य भवति स्थिरात्मव्यतिरिक्तस्य । तथा शब्दस्पर्शादिविषयोपभोगसिध्यर्थमुद्योगं मनोवाक्कायैः कः



कुर्यात् । तस्मादपि बुद्धीन्द्रियव्यतिरिक्त आत्मा सिद्धः, इति विज्ञानेश्वरः । एवम्—

"अहङ्कारात्परा बुद्धिर्बुद्धेरात्मा ततः परः ।
तस्मात्तु परमव्यक्तमव्यक्तात्पुरुषः परः ॥
परावरज्ञो भूतानां विधिज्ञः सर्वकर्मणाम् ।
सर्वभूतात्मभूतात्मा यं प्राप्यानन्त्यमश्नुते ॥"

इति, महाभारताश्वमेधपर्वणि ५० अध्याये सर्वातिरिक्तत्वमात्मनः प्रतिपादितम् । एवं तस्मिन्नेव ५१ अध्याये—

"भूतानामथ पञ्चानामथैषमीश्वरं मनः ।
नियमे च विसर्गे च भूतनां मन एव च ॥
अधिष्ठातृमनो नित्यं भूतानां महतां तथा ।
बुद्धिरैश्वर्यमाचष्टे क्षेत्रज्ञश्च स उच्यते ॥
इन्द्रियाणि मनो युङ्क्ते सदश्वानिव सारथिः ।
इन्द्रियाणि मनो बुद्धिः क्षेत्रज्ञे युज्यते सदा ॥
महदश्वसमायुक्तं बुद्धिसंयमनं रथम् ।
समारुह्य स भूतात्मा समन्तात्परिधावति ॥
इन्द्रियग्रामसंयुक्तो मनस्सारथिरेव च ।
बुद्धिसंयमनो नित्यं महान्ब्रह्ममयो रथः ॥
एवं यो वेत्ति विद्वान्वै सदा ब्रह्ममयं रथम् ।
स धीरः सर्वलोकेषु न मोहमधिगच्छति ॥"

इति, तदात्मनो बुद्धिमनसोरिन्द्रियाणां च स्वरूपस्वभावविज्ञानं च मुक्तिसाधनमभिवर्णितं भवति । "मनोनेत्रादिधीन्द्रियम्" इति कोशाच्चक्षुरादीनां पञ्चानामिन्द्रियाणां मनसश्च ज्ञानेन्द्रियत्वमभिहितम् । तस्मात्तदिन्द्रियव्यतिरिक्तत्वमात्मनः सिद्धम् ।

यत्तु क्षणिकविज्ञानिनां दर्शनम्, तदप्यसमञ्जसमेव । तथा हि—सति च क्षणिकविज्ञाने क्रमभावी च व्यवहारो नोपपद्यते, यतश्च सर्वे लोका ह्यनुकूलं वस्तु प्रथमतो जानन्ति, ततश्चेच्छन्ति, ततः प्रयतन्ते, ततस्तत्प्राप्नुवन्ति, ततः सुखं लभन्ते । यद्येतादृशमेककर्तृकतया भासमानं च व्यवहारमेकसन्तानवर्तिनो बहव आत्मानः परस्परवार्तानभिज्ञा अपि निष्पादयन्ति, तदा भिन्नसन्तानवर्तिनोऽपि किं न निष्पादयेयुः । तस्माद्य एवाहमिदं वस्त्वज्ञासिषम्, स एवाहमिदानीमित्यबाधितप्रत्यभिज्ञाननिर्वाहाय तस्मादन्यः स्थायी चात्मा ह्यभ्युपेय इति ।

यत्तु माध्यमिकं दर्शनं शून्यतत्वसमर्थनपरं च, तदपि न युक्तियुक्तम् । तथा हि—अहंप्रत्ययविषयत्वं चात्मनः श्रुतिशतविदितमेव । अहंप्रत्ययविषयत्वे चैव वादिनां विप्रतिपत्तयः । यद्धि वस्त्वहंप्रत्ययविषयम्, तदेव तत्त्वं तदेवात्मेति च सर्वसिद्धान्तः । यदि शून्यस्याहंप्रत्ययविषयत्वम्, तदा वन्ध्यापुत्रशशविषाणादीनामप्यहंप्रत्ययविषयत्वं च स्यात् । अहंप्रत्ययविषयस्वरूपनिर्णायकान्येव सर्वाणि दर्शनानीति । एवं विधाश्च नास्तिकसमयास्तत्त-



दार्यैर्ब्रह्मसूत्रभाष्येषु सयुक्तिकवादप्रतिवादविजृंभितैश्च वाक्यजालैः, अलङ्कृत्य शिरच्छेदवत्, विशेषतो ह्यभिवर्णिताः सन्ति दूषिताश्च । ग्रन्थविस्तरभयान्न तत्प्रकाराश्चात्र निरूपिताः । एवं भाषापरिच्छेदेऽपि—

"आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ।
शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ॥

तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः ।
मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् ॥

धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ।
प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः ॥

अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः ।
विभुर्बुध्यादिगुणवान्बुद्धिस्तु द्विविधा मता ॥"

इति, सयुक्तिकं देहाद्यतिरिक्तत्वसमर्थनपूर्वकं च तदात्मनो लक्षणं सम्यगुपपादितं भवति । अत्रात्मनो ह्यनुमानप्रमाणावगम्यत्वमपि च सदृष्टान्तं निरूपितं भवति ।

एवमात्मनस्तस्य शरीरेन्द्रियमनोबुद्धिशून्यव्यतिरिक्तत्वमभ्युपगच्छताम्, ये च मीमांसकास्तेषां मतमपीत्थं दौर्बल्यान्निराकरणीयम् । तथा हि—मीमांसकाः पुनस्तस्यात्मनः कर्तृत्वं भोक्तृत्वं चामनन्ति, न चैतद्युक्तम्, आत्मनस्तस्य सत्यपि कर्तृत्वे भोक्तृत्वस्य

स्वतो ह्यसंभवात्, प्रकृतिसंबन्धजत्वाच्च । तदुक्तं श्रीभगवद्गीतायां शुद्धार्यपरिष्कृतायां विंशेऽध्याये—

" प्रकृतिं पुरुषं चैव विध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ "

इति । अत्र चात्मयोगेन प्रकृतौ गुणानां संभवः, भोक्तृत्वं चात्मनो गौणमिति चोक्तं भवति ।

एवमात्मनः शरीरादिभिन्नत्वमभ्युपगच्छद्भिश्च सांख्यैरपि यदुक्तम्, आत्मनस्तस्य न कर्तृत्वं स्वाभाविकम्, सर्वगतस्य निरवयवस्य तस्य परिष्पन्दपरिणामलक्षणक्रियाविशेषायोगात् । स्वाभाविकत्वे तस्य चैतन्यवत्क्रियाविशेषो न कदापि व्यभिचरेत् । नापि कर्तृत्वमागन्तुकम्, निरवयवे च तस्मिन्कर्तृत्वहेतूपरागायोगात् । न चैवं तस्य भोक्तृत्वमपाकर्तुं शक्यम् । तस्माद्भोक्तैवात्मा न कर्तेति सिद्धमिति । एतदपि चाध्यात्मशास्त्रविरुद्धमेव । तदुक्तम् " कर्ता शास्त्रार्थवत्त्वात् " इति द्वितीयाध्याये तृतीयपादे च ३३ ब्रह्मसूत्रस्य भाष्येषु शङ्कराद्याचार्यविरचितेषु । तत्र च प्रकृतेर्गुणानां च वा न कर्तृत्वम्, किन्त्वात्मन एव तदित्युक्तं भवति । तद्विचारः सर्वेऽपि तत्रैव सयुक्तिकप्रमाणबद्धोक्तिप्रत्युक्तिभिरभिवर्णित इति ग्रन्थविस्तरभयान्न सोऽयमत्र



निरूपितः । आत्मन एव कर्तृत्वमिति च श्रीभगवद्गीतायां च शुद्धसमयसिद्धायां षष्टेऽध्याये—

" पञ्चैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥
अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥
तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ "

इत्युक्तं भवति । अत्रेदमवधेयम्—प्रवृत्युपहिते च संसारे न केवलमात्मनः कर्तृत्वमभ्युपगन्तुं शक्यते, तस्य चोक्ताधिष्ठानादिदैवपर्यन्तार्थसापेक्षत्वात् । अत एव तस्य सांसारिकप्रवृत्तिष्वपि स्वशरीराधिष्ठातृत्वरूपकर्तृत्वाश्रयत्वात्प्रवृत्तिफलसुखदुःखाश्रयत्वमुच्यते । तस्यैव तु शुद्धस्य तदधिष्ठानभूतस्वशरीराधिष्ठातृत्वरूपकर्तृत्वं तु स्वतः सिद्धमेव । एतदेव सांसारिकप्रवृत्तिषु कर्तृत्वं प्रकृतिसंसर्गकृतम्, न च स्वरूपकृतम् । तथा चात्मनः कर्तृत्वं स्वरूपकृतं प्रकृतिसंसर्गकृतं चेति द्विविधं विज्ञेयम् । तत्रैवं सति कर्तारम्, इत्यनेन तु सांसारिकप्रवृत्तिषु केवलमात्मनः कर्तृत्वं

स्वरूपकृतमिति वदन्तो निरस्ता भवन्तीति । अत एव तस्यामेव गीतायामेकविंशाध्याये चैवम्—

"प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥"

इति । सांसारिकवृत्तिषु जीवस्य कर्तृत्वं ह्यन्वयव्यतिरेकाभ्यां सत्वरजस्तमोगुणसंसर्गप्रयुक्तम्, न स्वरूपकृतं चेति चोच्यते । तस्मात्सांख्यदर्शनसिद्धं च प्रकृतेः कर्तृत्वं न स्वरूपप्रयुक्तमिति सिद्धं भवति ।

अत एवास्य शास्त्रस्य वक्ता महर्षिः प्रकरणेऽस्मिन्नात्मस्वरूपप्रतिपादनपरे च द्वितीयतरङ्गे "अकारस्वरूपं हि सर्वोपाधिकं नित्यमनाद्यनन्तं सत्यं सत्यभूतं च भवति । यद्धि किल नित्यं तदेव संख्याकालरहितं भवति । नारंभो नावसानं यस्य तदनाद्यन्तं भवति । आरंभावसाने च कालसंख्याभ्यां भवतः" इत्याह । अत्रायमाशयः—शब्दार्थयोस्तादात्म्यं मनसि निधाय, अकारस्वरूपमित्यादिनात्मानमेव निर्दिशति । अकारश्च सर्वोपाधिकः, यतो हि "अकारो वै सर्वा वाक्" इति श्रुतेरकारस्य सर्ववाङ्मयबीजभूतत्वमुच्यते । एवमात्मापि देवमनुष्यादिदेहोपाधिविशिष्टश्च भवति । अकारश्च नित्यः, अनाद्यनन्तत्वात् । एवमात्माप्यकारवाच्यश्च भवत्यारंभावसानरहितत्वात्, इति । आद्यन्तविशिष्टानां ध्वंसःखलुदृश्यते । आरंभो ह्यवसानं चाद्यन्तव्यवहारमूलम् । तस्मादात्मा ध्वंसाऽप्रतियोगीति भवति सिद्धम् । अतो भूतसंघातेन्द्रियमनसां ध्वंसप्रतियोगिनां चात्मस्वरूपत्वं वदतां लोकायतिकानां दर्शनं च महर्षिणा परास्तमिति विज्ञेयम् ।



एवमपि महर्षिणात्र "अकारोऽयमात्मा वर्णसंख्याक्रमकालरहितः शुद्धः सर्वत्रोपस्थितोऽनुपस्थितः प्रस्तरितश्च भवति" इत्युपक्रम्य तत्प्रमाणतया "सर्वत्र मन्तव्योऽमन्तव्यः प्रकाशोऽप्रकाशो ज्ञानाज्ञानरूपश्चेति लक्षणतयाऽस्ति कश्चिदन्यो जिज्ञास्यः, येनैतद्द्वयप्रदर्शनम्" इत्युक्तम् । अत्र चोपस्थितोऽनुपस्थितः, मन्तव्योऽमन्तव्यः, इत्यात्मविशेषणस्य प्रतिपादनादात्मनश्च विज्ञेयत्वेन ज्ञानगम्यत्वमुक्तं भवति । तथा च विज्ञानमेवात्मेति विज्ञानवादिनां दर्शनमपास्तं महर्षिणेति विज्ञायते । एवम् "कश्चिदन्यो जिज्ञास्यः ।" इत्यनेन तस्यैवात्मनः तद्देहाद्यतिरिक्तत्वं चाप्यभ्युपगतमिति च विज्ञेयम् ।

एवमस्मिन्नन्यत्र च महर्षिणा हि "अकारः सर्वशब्दानां मूलं भवति । अतश्चोच्यतेऽयं शब्दब्रह्मेति । नायं ह्यकारः शून्यस्वरूपः, भावस्वरूपावभासात् । स च न यावद्रूपेण प्रशस्तः । अतश्चास्य न संज्ञाबोध्यत्वं भवति । स्वरूपेणावस्थितस्यैव हि संज्ञा, अरूपाणां च संज्ञा निरर्था भवति" इति प्रतिपादितम् । अनेन चात्मनो जगज्जन्मादिकारणत्वम्, अत एव ब्रह्मस्वरूपत्वं भावस्वरूपत्वं संज्ञाबोध्यत्वं च सयुक्तिकमुक्तं भवति । अत्रायं भावः—यथा चायमकारः सर्वशब्दमूलं भवति, तथैवात्मापि देवतिर्य-

मनुष्यादिसर्वपदार्थजीवभूतो भवति । मूलं चात्र प्रतिष्ठा, अधिकरणमिति यावत् । अथवा मूलशब्दः प्रेरणार्थकः । तथा च यथा ह्यकारः सर्वशब्दप्रेरकः, तथा तदकारवाच्यो ह्यात्मापि सर्वपदार्थप्रेरको भवतीति भावः । सर्वप्रतिष्ठात्वं सर्वप्रेरकत्वं च सर्वधारकत्वमेव । तदात्मन्यपि दृश्यते । तदुक्तम्—

" अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ "

इति, श्रीभगवद्गीतायां शुद्धशास्त्रसिद्धायां द्वादशेऽध्याये च ब्रह्मस्वरूपप्रतिपादनपरे । धर्मेणानेनैव वेदस्याऽऽत्मतत्त्वस्य भावरूपेण प्रतीयमानत्वादभावरूपस्य च शून्यतत्त्वस्यात्मस्वरूपत्वसमर्थनं न सयुक्तिकप्रमाणावधेयमिति विज्ञेयम् । तदात्मवाचकत्वादेवाकारस्य शब्दब्रह्म, इति व्यवहारः । अत एव हि " अक्षराणामकारोऽस्मि " इति तस्यामेव श्रीभगवद्गीतायां पञ्चविंशोऽध्याये भगवदुक्तिः सङ्गच्छते । एवमात्मनोऽपि सर्वसन्निहितत्वेन प्रत्यक्षावगम्यत्वेन सर्वपदार्थस्थितत्वेन च ब्रह्मस्वरूपत्वमुच्यते । किं चायमात्मा न यावद्रूपेण भूतसङ्घातरूपेण प्रशस्तः । तथा च न तदात्मनः शुद्धस्य संज्ञाबोध्यत्वम्, तस्य स्वरूपेणावस्थितेरभावात् । स्वरूपेणाऽनवस्थितस्य तु न संज्ञा कर्तुं शक्यते । अतो देवदत्तादिनाम न तदात्मनि भवेत् इति । तस्माच्छून्यवादिनां मतं महर्षिणा निरस्यत इति विज्ञेयम् ।



इत्थं च पुनरन्यत्र महर्षिः " आत्मा यद्यपि संसारबद्धः, तथापि पङ्कजमिव पङ्कजं निर्मलः प्रसन्नश्च भवति । यथा च जलबिन्दुसङ्घातस्य समुद्राभिधेयत्वं भवति, तथा समुद्रेण च जलबिन्दोरवगतिः । सति च समुद्रे बिन्दुरित्येके, सति च बिन्दौ समुद्र इत्येके । पारभावनया चोभयोः सत्ता त्वेकैव भवति । यया चैतद्द्वयोरुपस्थितिः, सा सत्ता सैवात्मा, न समुद्रो न च बिन्दुः । अनेन च महतोऽल्पत्वमल्पस्यापि महत्वं च विज्ञायते । वास्तवसत्तायां न भेदः, परिणामभेदेन हि भेदस्य दृष्टत्वात् । तथा चैवमकारस्य सर्वाश्रयत्वं सिद्धम्" इति व्याचष्टे । अत्रात्मनः पुष्करपलाशवन्निर्लेपस्य संसारबद्धत्वेऽपि स्वरूपतो निर्मलत्वात्प्रसन्नत्वाच्च कर्ता भोक्ता संसारी सुखी दुःखी चेति व्यवहारो नोपपद्यत इति भावः । एवमल्पेषु महत्सु च तदात्मनश्चैकरूपेणावस्थितत्वात्सत्तास्वरूपत्वम्, तावता च सर्वाश्रयत्वं च सिद्धमिति भावः । अस्मादेव मीमांसकदर्शनं चात्मनः कर्तृत्वभोक्तृत्वादिप्रतिपादनपरं परास्तमिति विज्ञायते ।

एवम् " तदकारस्य क्रियया सह योगो दृश्यते । क्रियामात्रस्य स्थितिर्नैकदा च न, विना च कर्तारं क्रियाया अनिष्पत्तेः, कर्तृकरणकार्यप्रयोजनानां चतुर्णां परस्परसंबन्धनैयत्याच्च " इत्यपरत्र वदता महर्षिणा, संसारकार्याणां च सर्वेषां नियतपूर्ववृत्तित्वेन स्वतन्त्रत्वेन च तदात्मनः कारणत्वं कर्तृत्वं चोक्तं भवति ।

अत्र च क्रियाशब्देन तदधिकरणभूता प्रकृतिर्लक्ष्यते । एव मकारेणात्मा च । तथा च न पुनरात्मानं विना प्रकृतेः स्थितिर्भवति, एवमन्तरेण प्रकृतिमात्मनो न स्थितिर्विज्ञातुं शक्यते, इति विज्ञेयम् । कर्तृकरणकार्यप्रयोजनानामित्यत्र च, कर्तृशब्देनात्मा ज्ञानम्, करणशब्देन च संसारः क्रिया, कार्यशब्देनात्मसंसारयोगो निषेधपरं व्यष्ट्यवस्थितं च ब्रह्मस्वरूपमिच्छा च, प्रयोजनशब्देन समष्टिस्वरूपं ब्रह्म योगश्च कथितं भवति । एषां च चतुर्णां परस्परं सापेक्षत्वेन संबन्धश्च नियतः प्रोक्तो भवति । तस्मात्प्रकृतिः कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेप इति सांख्यानां दर्शनमनभ्युपगतं महर्षिणेति विज्ञेयं भवति ।

अत एव चैवं भूतो ह्यात्मैव "अकारवाच्योऽयमात्मा सर्वत्र संबद्धः स्वयमेव रूपभेदेन स्थानस्थातृस्थापकादिभेदेन च भासते । सर्वत्र विद्यमानत्वात्तस्य तथा प्राबल्यं विज्ञायते" इति महर्षिणोच्यते । अनेनात्मनः सर्वगतत्वं देवमनुष्यादिस्वरूपत्वेन भासमानत्वं चोक्तं भवति । अत्र च रूपभेदोऽवयवसंस्थानभेदः, स्थानभेदश्च लोकभेदः, स्थातृभेदश्च तदिन्द्रादिदेवताभेदः, स्थापकभेदश्च ब्रह्मविष्णुमहेश्वरादिभेदश्चेति विज्ञेयम् । अत एवास्यात्मनः संसारावश्यकत्वम्, संसारस्य तदात्मावश्यकत्वम्, सति च संसारयोगे तदात्मनः कर्तृत्वम्, तदात्मसमवधाने संसारस्य क्रियापरत्वं च विज्ञायते । अत एव च "आत्मवा-



चकोऽयमकारः सर्वात्मबोधकत्वेन संसृतिसंबद्धानां तेषां सर्वेषामात्मनां बोधको भवति । आत्मावश्यकोऽयं संसारः । अकारवाच्योऽयमात्मैवाणोरणीयान्महतो महीयांश्च भवति । अणुत्वमहत्वादिकं चास्यावस्थाकृतं वेदितव्यम्" इति महर्षिणा हि निगद्यते । स्पष्टोऽयमत्र प्रथमवाक्यार्थः । अनेनात्मनः संसृतिसंबद्धत्वासंबद्धत्वाभ्यां च द्वैविध्यमुक्तं भवति । एवमकारोऽपीति विज्ञेयम् । संसृतिश्च संसारः । स च देवमनुष्यादियोनिषु गुणसङ्गेन भोगार्थमात्मनो गमनमेव । तदुपलक्षितो ह्यात्मैव संसारसंबद्ध इत्युच्यते । तथा चैवमात्मनामनेकत्वमपि धर्मसिद्धं चोक्तं भवति । अनेन च प्रकृतिबद्धानामात्मनामेकत्ववादोऽपि निरस्तो भवतीति विज्ञेयम् । अत्रात्मदृष्टया तु संसारस्य नित्यत्वमप्यात्मावश्यकोऽयं संसार इति कथितं भवति । अत एव च "नायमात्मा प्रवचनेन लभ्यः, इति श्रुतौ सत्यामपि, आत्मा वा रे द्रष्टव्यः" इत्यादिना तदात्मनः प्रवचनलभ्यत्वमुक्तं भवति । तदुक्तमृषिणा "जगद्दृष्ट्या चास्य प्रवचनलभ्यत्वं बोध्यम्" इति । एवं त्वत्र तस्य कालकृतावस्थोपलक्षितेन नियतेन च संसारेण, अणुत्वमहत्वादिकं च स्वरूपं लक्षणं च "अणोरणीयान्महतो महीयान्" इति कठश्रुतिसिद्धं हि भवतीत्युक्तं भवति । एवं "शुद्धमपापविद्धम्" इतीशावास्यश्रुत्यभिवर्णितस्य त्वात्मनश्च "अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारम्" इति माण्डूक्यश्रुतिसमभिवर्णितं चानिर्देश्यत्वम् "आत्मैवेदं सर्वम्" इति बृहदारण्यश्रुत्यु-

दिसं च सर्वनिर्देशकत्वम् "अ इत्यस्य निर्देशको न कश्चिद्भवति, सर्वनिर्देशकत्वात्तस्य" इति महर्षिणात्र कथितमस्ति ।

तदात्मनः स्वरूपस्य तु पूर्णत्वमपूर्णत्वं चास्तीति बुध्यते । पूर्णत्वं च तदात्मनः शुद्धस्य भवति । आत्मनः शुद्धत्वं च स्वदृष्ट्या स्वनियतप्रकृत्यवस्थितत्वमेव । अशुद्धत्वं च तस्य संसारदृष्ट्या ह्यनियतप्रकृतिबद्धत्वम् । अपूर्णत्वं चात्मनो ह्यशुद्धस्य भवति । यश्चायमात्मा, व्यापकस्तेजोमयः सुखदुःखादिभोगसाधनदेहानवच्छिन्नः पुण्यपापानाविष्टश्च, स शुद्ध इति निष्कर्षः । न चात्मनो हि नियता प्रकृतिरस्तीति वाच्यम्, विना च प्रकृतिमात्मनस्थितेरसंभवात् । न च शुद्धत्वं तदात्मनः प्रकृत्यनवस्थितत्वरूपं भवति, तस्य स्वतो देवीप्रकृतिकत्वात् । ब्रह्मादि पिपीलिकान्तेष्वपि पदार्थेषु चोच्चावचेषु सर्वदैकरूपेण भासमानं वस्तु यदधिकारिभिश्च शुद्धैर्विज्ञायते, तच्छुद्धात्मस्वरूपमिति राद्धान्तः । तस्मादात्मनः पूर्णत्वमपूर्णत्वं च सिद्धमेवेति विज्ञेयम् । आत्मनस्त्वपूर्णस्य पृथग्रूपेण च भासमानत्वादेव हि विशेषव्याप्तिः, परिव्याप्तिश्च भवति तस्य पूर्णावस्थायामेव । विशेषव्याप्तिकस्य च तस्य सविषयकत्वं सावयवत्वं च सिद्धमेव । पूर्णे च तस्मिन्नैतत्संभवति, तस्मिन्निच्छाया असंभवात् । इच्छा त्वपूर्णात्मनियतधर्मविषया भवति । तदात्मनो हि सावधिकेन च देहबलेन पूर्णत्वापूर्णत्वव्यवहारः । संसारपरं च जगदिदमपूर्णम् । तज्जगदन्तःपातित्वेनैव ह्यात्मनो-



ऽप्यपूर्णत्वम् । तदवलंब्यैव हि तस्य भवन्ति संस्कारा वर्णाश्रमधर्माश्चेति सिद्धाः । पूर्णत्वे तु तस्य न वर्णाश्रमधर्मसंस्कारापेक्षा । तदित्थमुच्यते भारतगोभिलकारिकायाम्—

"संसारव्यवसायस्य पूर्तिस्तु स्याद्यदात्मनः ।
तदैव तस्य भवति पूर्णत्वं नान्यथा भवेत् ॥
तदात्मनश्च पूर्णस्य नैव कार्यं च विद्यते ।
सफलं श्रुतिसिद्धं च कर्म संस्कारलक्षणम् ॥
यदाऽपरिसमाप्तश्च संसारे तस्य चात्मनः ।
व्यवसायो भवेत्सर्वस्तदाऽपूर्णत्वमुच्यते ॥
तदा सर्वाणि कर्माणि कार्याण्येवेति निश्चयः ।
न्याय्यानि विपरीतानि ह्यधिकारिभिरादरात् ॥
अपूर्णत्वे त्वशुद्धिः स्यात्पूर्णत्वे शुद्धिरिष्यते ।
एकस्यैवात्मनस्तस्मादुभयोश्च ह्यवस्थयोः ॥
संसारो नियतः प्रोक्तस्तच्छुद्धाऽशुद्धलक्षणः ।
तस्यैवं ह्यात्मनश्चेति विज्ञेयं स्यान्मुमुक्षुभिः ॥"

इति । इत्थं प्रबन्धकृतापि महर्षिणा "अकारस्य सर्वत्रानुगतावधेयत्वात्परिव्याप्तिर्न दृश्यते, किं तु विशेषव्याप्तिः ।" तस्या अपि निरवयवत्वं निर्विषयकत्वं च नोपकल्प्यते, पूर्णे हीच्छाया असंभवात् । इच्छा त्वपूर्णविषयेति पूर्णं न प्रसज्येत । अवधिभूतेनापि तत्तद्देशबलेन पूर्णापूर्णयोरुपस्थितिः, जगदिदमपूर्णम्, पूर्णं

दितं च सर्वनिर्देशकत्वम् "अ इत्यस्य निर्देशको न कश्चिद्भवति, सर्वनिर्देशकत्वात्तस्य" इति महर्षिणात्र कथितमस्ति ।

तदात्मनः स्वरूपस्य तु पूर्णत्वमपूर्णत्वं चास्तीति बुध्यते । पूर्णत्वं च तदात्मनः शुद्धस्य भवति । आत्मनः शुद्धत्वं च स्वदृष्ट्या स्वनियतप्रकृत्यवस्थितत्वमेव । अशुद्धत्वं च तस्य संसारदृष्ट्या ह्यनियतप्रकृतिबद्धत्वम् । अपूर्णत्वं चात्मनो ह्यशुद्धस्य भवति । यश्चायमात्मा, व्यापकस्तेजोमयः सुखदुःखादिभोगसाधनदेहानवच्छिन्नः पुण्यपापानाविष्टश्च, स शुद्ध इति निष्कर्षः । न चात्मनो हि नियता प्रकृतिरस्तीति वाच्यम्, विना च प्रकृतिमात्मनस्थितेरसंभवात् । न च शुद्धत्वं तदात्मनः प्रकृत्यनवस्थितत्वरूपं भवति, तस्य स्वतो दैवीप्रकृतिकत्वात् । ब्रह्मादि पिपीलिकान्तेष्वपि पदार्थेषु चोच्चावचेषु सर्वदैकरूपेण भासमानं वस्तु यदधिकारिभिश्च शुद्धैर्विज्ञायते, तच्छुद्धात्मस्वरूपमिति राद्धान्तः । तस्मादात्मनः पूर्णत्वमपूर्णत्वं च सिद्धमेवेति विज्ञेयम् । आत्मनस्त्वपूर्णस्य पृथग्रूपेण च भासमानत्वादेव हि विशेषव्याप्तिः, परिव्याप्तिश्च भवति तस्य पूर्णावस्थायामेव । विशेषव्याप्तिकस्य च तस्य सविषयकत्वं सावयवत्वं च सिद्धमेव । पूर्णे च तस्मिन्नैतत्संभवति, तस्मिन्निच्छाया असंभवात् । इच्छा त्वपूर्णात्मनियतधर्मविषया भवति । तदात्मनो हि सावधिकेन च देहबलेन पूर्णत्वापूर्णत्वव्यवहारः । संसारपरं च जगदिदमपूर्णम् । तज्जगदन्तःपातित्वेनैव ह्यात्मनो-



ऽप्यपूर्णत्वम् । तदवलंब्यैव हि तस्य भवन्ति संस्कारा वर्णाश्रमधर्माश्चेति सिद्धाः । पूर्णत्वे तु तस्य न वर्णाश्रमधर्मसंस्कारापेक्षा । तदित्थमुच्यते भारतगोभिलकारिकायाम्—

"संसारव्यवसायस्य पूर्तिस्तु स्याद्यदात्मनः ।
तदैव तस्य भवति पूर्णत्वं नान्यथा भवेत् ॥
तदात्मनश्च पूर्णस्य नैव कार्यं च विद्यते ।
सफलं श्रुतिसिद्धं च कर्म संस्कारलक्षणम् ॥
यदाऽपरिसमाप्तश्च संसारे तस्य चात्मनः ।
व्यवसायो भवेत्सर्वस्तदाऽपूर्णत्वमुच्यते ॥
तदा सर्वाणि कर्माणि कार्याण्येवेति निश्चयः ।
न्याय्यानि विपरीतानि ह्यधिकारिभिरादरात् ॥
अपूर्णत्वे त्वशुद्धिः स्यात्पूर्णत्वे शुद्धिरिष्यते ।
एकस्यैवात्मनस्तस्मादुभयोश्च ह्यवस्थयोः ॥
संसारो नियतः प्रोक्तस्तच्छुद्धाऽशुद्धलक्षणः ।
तस्यैवं ह्यात्मनश्चेति विज्ञेयं स्यान्मुमुक्षुभिः ॥"

इति । इत्थं प्रबन्धकृतापि महर्षिणा "अकारस्य सर्वत्रानुगतावधेयत्वात्परिव्याप्तिर्न दृश्यते, किं तु विशेषव्याप्तिः । तस्या अपि निरवयवत्वं निर्विषयकत्वं च नोपकल्प्यते, पूर्णे हीच्छाया असंभवात् । इच्छा त्वपूर्णविषयेति पूर्णं न प्रसज्येत । अवधिभूतेनापि तत्तद्देशबलेन पूर्णापूर्णयोरुपस्थितिः, जगदिदमपूर्णम्, पूर्णं

च किञ्चिदन्यदिति सिद्धान्तितत्वात्" इति, एवमेव "संसारे चात्मनः संस्कारः, अपूर्णत्वं च विज्ञेयम् । आत्मनश्च पुनः सति योगे संसारेण संस्कारः । तेन च तस्याऽपूर्णत्वं च दृश्यते, बीजमिव तत्कृतं भवतीति निश्चयात् । तत्रैवेच्छाद्यारोपणम्, अणुत्वमहत्वव्यापकत्वादि च भन्यते । सर्वस्य कारणमात्मा । तद्वद्वर्णानां कारणमकार इति फलितं भवति । तस्मादकारस्य केवलत्वं तदुकारादियोगेन संसर्गोऽपि च भासते । कर्ता च यस्य यादृशः, तादृशं तत्कार्यं च भवतीति न्यायः । कर्ता ह्यवश्यं कार्ये तिष्ठति, विना च कर्तारं कार्योत्पत्तेरदर्शनात् । सति च कर्तुरपूर्णत्वेऽनित्यत्वे च कार्यस्याप्यनित्यत्वमपूर्णत्वं च भवेदिति निश्चितं भवति । तस्मादात्मनः संसारेऽपूर्णत्वं निश्चितं भवति" । इति चाख्यातम् ।

जातिः पदार्थ इति पक्षमवलंब्यैव हि तदकारस्यात्मसामान्यबोधकत्वं च "आत्मवाचकोऽयमकारः सर्वात्मबोधकत्वेन संसृतिसंबद्धानामपि तेषां सर्वेषामात्मनां बोधको भवति" इति महर्षिणाऽभिधीयते । अत्रायं भावः—यश्चात्मा जीवात्मा प्रत्यगात्मा सूत्रात्मा परमात्मा चेति तत्तच्छास्त्राभिवर्णिताः, ते सर्वेऽपि तदकारवाच्या भवन्तीति । अत्रेदमवधेयम्—अवतेरततेश्च, अ इति शब्दो निष्पन्नो भवति । ततश्च रक्षकत्वं व्यापकत्वं च, अ शब्दार्थः । एवमाभ्यामुभाभ्यां च धातुभ्यामेव मनिन्प्रत्यये सति तदात्मशब्दो भवति ।



यश्च सर्वरक्षकः सर्वव्यापकश्च स आत्मा भवति । तस्मादकारस्यात्मसामान्यवाचकत्वं संभवतीति । यद्यपि कोशादौ तदकारस्य विष्णुवाचकत्वमुक्तम्, तथापि विष्णुशब्दस्य योगशक्त्या व्यापकरक्षकवस्तुबोधकत्वेन तदात्मबोधकत्वस्याऽपि युक्तत्वात् । अत एव तस्याकारस्य ब्रह्मवाचकत्वमपि कोशादौ हि दृश्यते । इत्थं हि तदात्मशब्दस्य निरुक्तिः शास्त्रेषु दृश्यते—

"यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।
यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते ॥"

इति । अनेनास्यात्मनः सृष्ट्यादिकर्तृत्वमुक्तं भवति । जीवात्मा च—जीवति जीवयति वा प्राणधारणेन भूतेन्द्रियसंघातरूपं शरीरमिति जीवात्मा । ततश्च यः संसार्यात्मा स जीवात्मेति बुध्यते । प्रत्यगात्मा च—प्रत्यक्चासावात्मेति प्रत्यगात्मा । ततश्च स्वस्वभावो ह्यात्मा च प्रत्यगात्मेति निश्चयः । सूत्रात्मा च—सूत्रमिव सर्वानुस्यूत आत्मा स्वरूपं यस्य, स सूत्रात्मा भवति । ततश्च यः सर्वत्र चैकाकारतया व्यापृतो ह्यात्मा स सूत्रात्मेति भावः । परमात्मा च परः अस्मान्मेति परमः, परमश्चासावात्मेति परमात्मा सर्वेषामीश्वरः, तदुक्तम्—

"स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा निरूपितः ॥"

इति । एवं गीतायामपि तस्य चेश्वरत्वेनाभिवर्णितत्वम् "बिभर्त्य-

व्यय ईश्वरः'' इति वाक्येन दृश्यत इति । एवं कोशविभागेन ह्यात्मनां स्वरूपभेदो हि संज्ञया कथ्यते च शुद्धशास्त्रैः । तत्सर्वं च श्रीभगवद्गीतायां शुद्धदर्शनसिद्धायां विंशेऽध्याये प्रतिपादितम् । एवं यश्च श्रुतिस्मृतीतिहासपुराणादिषु प्रतिपादितानामात्मशब्दानां भवति यथाप्रकरणमर्थभेदश्च मुमुक्षुजनविज्ञेयः, स च सर्वोऽपि, अध्यात्मशब्दरत्नार्णवे भगवन्नन्दिकेश्वरविरचिते च व्याख्यातो भवति । सोऽयं प्रबन्धश्च शुद्धार्यपुस्तकालये विद्यत इति विज्ञायते । यच्चात्र विशेषतो वक्तव्यम्, तत्सर्वं प्रणववादतृतीयप्रकरणे चारभ्य सप्तदशतरङ्ग पञ्चसु तरङ्गेषु क्रियमाणे विमर्शे च प्रतिपादितं भविष्यत्यस्माभिः । वस्तुतस्तूक्तानां च सर्वेषामात्मनां ब्रह्मस्वरूपत्वं च ''अयमात्मा ब्रह्म'' इत्यादि श्रुतिसिद्धं भवति । अत एव ''आत्मनो ब्रह्मणश्चाकारेण प्रवचनं भवति, आत्मैव ब्रह्मणो बोधकारणमिति नियमात् । अन्यथा तु तद्ब्रह्म सर्वैरपरिच्छिन्नमित्यभिधानं स्यात्'' इति महर्षिणोच्यते । अत्रायमाशयः—ब्रह्मविज्ञानं तु आत्मविज्ञानमूलमेव । अतः परप्रेप्सुभिरधिकारिभिश्च ब्रह्मस्वरूपत्वेन प्रथममात्मैव समुपास्यः, ततस्तद्विज्ञानमेव मुमुक्षूणामावश्यकमिति च कथितमिति । तस्मादशब्दस्यात्मशब्दस्य चैकधातुमूलकत्वेन तदकारस्यात्मवाचकत्वं सिद्धमित्यलम् ।

अथ प्रणवस्य द्वितीयोऽक्षर उकारः । तस्य स्वरूपं चेत्थमुच्यते महर्षिणा ''ओमित्यत्र द्वितीयेनोकारेण संसारोऽभिधीयते । तस्याप्यनाद्यनन्तत्वविशेषणं भवति, तदधिष्ठितस्यात्मनस्तथा हि दर्शनात् । संसारपदेन सर्वोपाधिस्वरूपं स्थूलसूक्ष्मप्रकृतिविकृत्यादिकं च बुध्यते । अतः संसारप्रवचनार्थोऽयमुकारो भवति'' इति । अत्र च यथा ह्योमिति प्रणवदृष्ट्या द्वितीयस्योकारस्यावश्यनियतत्वम्, तथा ब्रह्मदृष्ट्या द्वितीयस्य संसारस्याप्यावश्यकत्वं विज्ञायत इति भावः । अत एव तस्य ''भूमिरापोऽनलो वायुः'' इत्यादिब्रह्मस्वरूपगीतावचनेन ब्रह्मस्वरूपत्वमुक्तं भवति । अकारोकारयोः सन्धिरूपे चोकारे, यथा ह्यकारो लुप्तो बद्धश्च दृश्यते, तथा संसारगतश्चात्मा तत्रैव लुप्तो बद्धश्च संसाररूपः परिदृश्यते । तस्मिंश्च संसार एव हि स्थूलसूक्ष्मादिस्वरूपं च यथाक्रममात्मशक्त्यैव विज्ञायते । एवं स्थूलसूक्ष्मादिस्वरूपस्य संसारस्यैव प्रपञ्च इति व्यवहारः । आत्मयोगेन चाष्टतत्वात्मकप्राकृतमण्डलोद्भिन्नया त्रिरूपया माययैव तदात्मनो बन्धः परिदृश्यते । तदुक्तम्—

''सत्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥''

इति, श्रीभगवद्गीतायां शुद्धदर्शनसिद्धायां च दशमे मायाध्याये । अत्रेदमवधेयम्—प्रकृत्यात्मनोश्च सत्यपि परमपुरुषनित्यशुद्धसत्यसङ्कल्पसिद्धे च शाश्वते योगे, ब्रह्मशक्तिस्वरूपायाश्चात्मशक्तेर्यदा प्रकृतावावेशः, तदा गुणानामुक्तानां च प्रकाशः । या च प्रकृतिपरा ह्यात्मशक्तिः, सैव माया भवति । गुणगुणिनोश्च जन्यजन-

कयोरभेदाध्यवसायेन शास्त्रेषु गुणानां मायेति व्यवहारः। अत एव "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति श्वेताश्वतरश्रुत्या मायायाः प्रकृतेश्चाभेदः कथितो भवति। तदात्मनः संसरणप्रकाराश्च मायाप्रकृतियोगसञ्जातगुणहेतुकाः, ज्ञानमिच्छा-क्रियासमाहारश्चेति प्रसिद्धाश्चत्वारो भवन्ति। एषु च संसरणप्रकारेषु चतुर्षु प्रथमाश्च त्रयः प्रवृत्तिपरा ह्युपक्रमस्वरूपा भवन्ति, तुरीयस्तु निवृत्तिपरो ह्युपसंहारात्मक इति च विज्ञेयम्। तदात्मनः प्रवृत्तौ तु दृष्टिः सगुणा बाह्या च भवति, निवृत्तौ तु सा दृष्टिः स्वस्वरूप-विषया निर्गुणा च दृश्यते। अस्ति च तृतीया दृष्टिश्च शुद्धा साम्यलक्षणा। उपक्रमे तु तदात्मशक्तिः प्रकृतौ प्रसरति, उपसंहारे तु सा स्वात्मन्येव समाविशति। भवति च तदुपक्रमोपसंहारयोश्च प्रत्येकं शुद्धाशुद्धत्वभेदेन द्वैविध्यम्। तावेवोपक्रमोपसंहारौ शुद्धौ भवतः, यौ च सन्यासत्यागमूलौ। तदन्यौ च तावशुद्धौ विज्ञायेते। शुद्धोपक्रमोपसंहारश्चाधिकारी संपूर्णस्वव्यवसायः परं व्यवसायान्तरोपयोगि च पदं समधितिष्ठति। तदन्यश्चाधिकारी स्वानुभूतव्यवसायमेव प्राकृतमण्डलं स्वनियतव्यवसायपूर्तये पुनरा-वर्तते। तस्मात्तदात्मा च स्वशक्तिविकसितैश्च गुणैस्त्रिभिः स्वानु-रूपप्रकृतिमण्ले बद्धः शक्तश्च यथारूपं संसरतीत्यत्र कथितं भवतीति। अत्र कुमारो भगवानाचार्यश्च—सर्वमिदं जगद्ब्रह्म-शक्त्या समाक्रान्तम्, सैव ह्यात्मशक्तिरिति मायेति च गीयते, सर्वब्रह्मण्डाधिपतेश्च ब्रह्मप्रतिनिधेः परमात्मनः, तथाऽवतारपुरुषाणां



च ब्रह्मांशानाम्, भद्रादिलोके संसरतां चात्मनाम्, प्रत्येकं क्रमशश्च देवी कल्याणी सरूपा चेति स्वव्यवसायसाधनं च प्रकृतिर्भवति। प्रत्येकमासु प्रतिबिम्बिता ब्रह्मशक्तिस्वरूपा चात्मशक्तिर्मायापद-वाच्या यथाक्रमं दैव्येषा गुणमयीति कीर्तिता भवति। मायैव पर-मात्मादीनां कार्येषु च सर्वेषु नायिका भवति। तयैव पुनः स्वस्व-संसारनियतया च तया परिबद्धो ह्यात्मा स्वनियतसंसारव्यवसायमा चरति। माययैव भवति स्वात्मशङ्कुविज्ञानं च परप्राप्तिसाधनम्। सर्वेषां चैवाधिकारिणां तदीशानां वा स्वप्रकृतिनियतमायागुण-बन्धेनैव स्वनियतसंसारव्यवसायः पूर्णः प्रशस्तश्च भवेत्।" इत्याह। तथा हि—

"ब्रह्मशक्त्या समाक्रान्तं जगत्सर्वं च सेश्वरम्।
सैवात्मशक्तिरीशा स्यान्माया चेति निगद्यते ॥ १ ॥
तथा देवी च कल्याणी सरूपा चेति नामतः।
प्रकृतिस्त्रिविधा ज्ञेया ह्यासां प्रत्येकमेव तु ॥ २ ॥
दैव्येषा गुणमयीति माया स्याच्च यथाक्रमम्।
प्रकृतौ बिम्बिता त्वात्मशक्तिर्मायेति कथ्यते ॥ ३ ॥
संभवन्ति गुणास्तस्यास्त्रिविधा बन्धहेतवः।
बद्धाश्च तैर्गुणैः सर्वे कर्म कुर्वन्त्यतन्द्रिताः ॥ ४ ॥
परमात्मा तदीयाश्च देवीप्रकृतिभाविताः।
मायया चैव दैव्या स्युः प्रबद्धा लोकनायकाः ॥ ५ ॥

उपक्रमोपसंहारौ संसारस्य विशुद्धया ।
दृष्ट्या च निर्वहन्तस्ते यान्ति तस्मात्परं पदम् ॥ ६ ॥

एकांशं ब्रह्मणो ये तु ह्यवष्टभ्य यथायुगम् ।
धर्मसंरक्षणार्थाय चावतीर्णा ह्यधिष्ठिताः ॥ ७ ॥

कल्याणीं प्रकृतिं ते तु बद्ध्वा चैशाख्यमायया ।
साधुभ्यः संप्रयच्छन्ति शाश्वतं त्वभयं परम् ॥ ८ ॥

संसारस्य तु तेषां हि स्वेच्छया च स्वयोगतः ।
उपक्रमोपसंहारौ भवेतां क्षणिकौ परौ ॥ ९ ॥

शेषा भद्रादिलोकस्थास्त्वात्मानः पूर्वकर्मणः ।
सरूपां प्रकृतिं प्राप्य गुणमय्या तु मायया ॥ १० ॥

प्रबद्धाश्च यथाकालं संसरन्ति परेच्छया ।
उपक्रमोपसंहारौ तेषां स्यातां यथाबलम् ॥ ११ ॥

एवं हि मायिको बन्धः प्राकृतश्चात्मनां तु यः ।
स चकास्ति द्विधा चेति विज्ञेयः स्यान्मुमुक्षुभिः ॥ १२ ॥

प्रकृतौ भासमानानां विभूतीनां च सर्वशः ।
तदात्मशक्तिरेव स्यान्मूलमित्येव ये विदुः ॥ १३ ॥

तेषां मायाकृतो बन्धः स्यात्परप्राप्तिकारणम् ।
येषां प्राकृतभूतानां मूलं प्रकृतिरेव हि ॥ १४ ॥



भवेदिति च विज्ञानं तेषां बन्धस्तु मायिकः ।
काले पुनः पुनश्चैव स्यादधोगतिकारणम् ॥ १५ ॥

इत्थमत्रोपदिष्टानां वासुदेवेन योगिना ।
श्लोकानां संग्रहार्थश्च विज्ञेयः स्यान्मुमुक्षुभिः ॥ १६ ॥

अत्र ह्याद्योपदेशेन सर्वेषामधिकारिणाम् ।
ब्रह्मशक्तिपरिज्ञानमावश्यकमुदाहृतम् ॥ १७ ॥

अथ तेन द्वितीयेन नामनिर्देशपूर्वकम् ।
ब्राह्मयाः शक्तेश्च मायायाः स्वरूपं समुदाहृतम् ॥ १८ ॥

तथा तस्याः परिज्ञानात्परप्राप्तिश्च सोदिता ।
तृतीयेनात्मनः प्रोक्तो बन्धश्चैव गुणैस्त्रिभिः ॥ १९ ॥

यः सुखस्य च दुःखस्य हेतुर्बन्धः स चोदितः ।
पूर्वमेव यथातत्त्वमात्मनश्च यथाफलम् ॥ २० ॥

ततस्त्रिभिश्चोपदेशैः सात्त्विको राजसस्तथा ।
तामसश्चैव बन्धः स्यात्कथितो ह्यात्मनः क्रमात् ॥ २१ ॥

ततः श्रीवासुदेवस्य ह्युपदेशे तु सप्तमे ।
यथाकार्यं गुणानां स्यादुत्कर्षश्चैव कीर्तितः ॥ २२ ॥

प्रत्येकं तु गुणानां च प्राकृतानामथाष्टमे ।
उक्तं ह्यसाधारणं च स्वाराज्यं तन्महात्मना ॥ २३ ॥

स्याज्ज्ञानकर्मकर्तॄणां बद्धानां तद्गुणैस्त्रिभिः ।
प्रत्येकं नवमे चास्मिन्त्रैविध्यमिति कीर्तितम् ॥ २४ ॥

तत्कर्तुरीप्सिततमं कर्मेति हि निगद्यते ।
ततश्चेच्छापि कथिता कर्ता चात्रेति निर्णयः ॥ २५ ॥

ततश्च नवभिः श्लोकैः क्रमशो हि निगद्यते ।
ज्ञानादीनां च प्रत्येकं त्रैविध्यं गौणमुच्यते ॥ २६ ॥

ततश्चैकोनविंशे च श्लोके भगवता पुनः ।
गौणो बन्धश्च नित्यः स्यात्सर्वेषामिति कीर्तितः ॥ २७ ॥

कथितानि ततो विंशे गुणकार्याणि सर्वशः ।
एकविंशे फलं प्रोक्तं सात्विकाद्यधिकारिणाम् ॥ २८ ॥

ब्रह्मशक्तिपरिज्ञानं विना ये गुणकर्मसु ।
सक्ताः प्राकृतभोगे च द्वाविंशे ते तु निन्दिताः ॥ २९ ॥

त्रयोविंशे तु भगवद्वासुदेवेन योगिना ।
उपक्रमपराऽशुद्धा वेदाश्चैव हि दूषिताः ॥ ३० ॥

तथोपसंहारपरा ये च ते संस्तुतास्तथा ।
उपसंहारमूलं च फलं प्रोक्तं विविच्य हि ॥ ३१ ॥

तस्मान्मां च ब्रह्मशक्तिमात्मशक्तिस्वरूपिणीम् ।
ध्यानयोगेन सेवन्ते ये ते सन्तः परेप्सवः ॥ ३२ ॥



मायाबन्धेन तेनैव यान्ति ब्रह्म सनातनम् ।
इत्यत्र चान्तिमेनैव श्लोकेनोक्तं परात्मना " ॥ ३३ ॥

इति । एवं भगवता नारदेन मायागीतार्थश्चोक्तः—

" अथातो ब्रह्मशक्तेश्च यथाधिष्ठानमेव हि ।
आत्मशक्तिस्वरूपा या महिमा वर्ण्यतेऽत्र हि ॥ १ ॥

प्रकृतेरात्मशक्तेश्च सति योगे महर्षयः ।
प्रकृतेरात्मदृष्टायास्तिस्रश्चैव गुणाभिधाः ॥ २ ॥

शुक्ललोहितकृष्णाश्च निस्सरन्ति हि दीप्तयः ।
यथादित्यवज्रयोगाच्चित्रवर्णाश्च वज्रतः ॥ ३ ॥

एवं सा प्रकृतिश्चैव ह्यात्मशक्त्या तरङ्गिता ।
सहस्रशस्तदात्मानमावृणोत्यमलं गुणैः ॥ ४ ॥

तथा वृतः सोऽयमात्मा पञ्चविंशः परावरः ।
यथाक्रमं तरङ्गेषु दृश्यो भवति योगिभिः ॥ ५ ॥

यथोन्मत्ताः स्वस्वरूपं न जानन्ति तथैव हि ।
तद्दीप्तिकारणं चात्मशक्तिं वै प्राकृता जनाः ॥ ६ ॥

गुणाख्यास्ताश्च मायेति कथ्यन्ते ह्यखिलागमैः ।
देव्येषा गुणमयीति भेदस्तस्यास्तु विद्यते ॥ ७ ॥

मुमुक्षुभिरनात्मज्ञैः सैव माया विनिन्द्यते ।
आत्मज्ञैस्तैश्च सैव स्यात्पूजिता च परात्पये ॥ ८ ॥

स्याज्ज्ञानकर्मकर्तॄणां बद्धानां तद्गुणैस्त्रिभिः ।
प्रत्येकं नवमे चास्मिन्त्रैविध्यमिति कीर्तितम् ॥ २४ ॥

तत्कर्तुरीप्सिततमं कर्मेति हि निगद्यते ।
ततश्चेच्छापि कथिता कर्ता चात्रेति निर्णयः ॥ २५ ॥

ततश्च नवभिः श्लोकैः क्रमशो हि निगद्यते ।
ज्ञानादीनां च प्रत्येकं त्रैविध्यं गौणमुच्यते ॥ २६ ॥

ततश्चैकोनविंशे च श्लोके भगवता पुनः ।
गौणो बन्धश्च नित्यः स्यात्सर्वेषामिति कीर्तितः ॥ २७ ॥

कथितानि ततो विंशे गुणकार्याणि सर्वशः ।
एकविंशे फलं प्रोक्तं सात्विकाद्यधिकारिणाम् ॥ २८ ॥

ब्रह्मशक्तिपरिज्ञानं विना ये गुणकर्मसु ।
सक्ताः प्राकृतभोगे च द्वाविंशे ते तु निन्दिताः ॥ २९ ॥

त्रयोविंशे तु भगवद्वासुदेवेन योगिना ।
उपक्रमपराऽशुद्धा वेदाश्चैव हि दूषिताः ॥ ३० ॥

तथोपसंहारपरा ये च ते संस्तुनास्तथा ।
उपसंहारमूलं च फलं प्रोक्तं विविच्य हि ॥ ३१ ॥

तस्मान्मां च ब्रह्मशक्तिमात्मशक्तिस्वरूपिणीम् ।
ध्यानयोगेन सेवन्ते ये ते सन्तः परेप्सवः ॥ ३२ ॥



मायाबन्धेन तेनैव यान्ति ब्रह्म सनातनम् ।
इत्यत्र चान्तिमेनैव श्लोकेनोक्तं परात्मना" ॥ ३३ ॥

इति । एवं भगवता नारदेन मायागीतार्थश्लोकः—

"अथातो ब्रह्मशक्तेश्च यथाधिष्ठानमेव हि ।
आत्मशक्तिस्वरूपा या महिमा वर्ण्यतेऽत्र हि ॥ १ ॥

प्रकृतेरात्मशक्तेश्च सति योगे महर्षयः ।
प्रकृतेरात्मदृष्टायास्तिस्रश्चैव गुणाभिधाः ॥ २ ॥

शुक्ललोहितकृष्णाश्च निस्सरन्ति हि दीप्तयः ।
यथादित्यवज्रयोगाच्चित्रवर्णाश्च वज्रतः ॥ ३ ॥

एवं सा प्रकृतिश्चैव ह्यात्मशक्त्या तरङ्गिता ।
सहस्रशस्तदात्मानमावृणोत्यमलं गुणैः ॥ ४ ॥

तथा वृतः सोऽयमात्मा पञ्चविंशः परावरः ।
यथाक्रमं तरङ्गेषु दृश्यो भवति योगिभिः ॥ ५ ॥

यथोन्मत्ताः स्वस्वरूपं न जानन्ति तथैव हि ।
तद्दीप्तिकारणं चात्मशक्तिं वै प्राकृता जनाः ॥ ६ ॥

गुणाख्यास्ताश्च मायेति कथ्यन्ते ह्यखिलागमैः ।
दैव्येषा गुणमयीति भेदस्तस्यास्तु विद्यते ॥ ७ ॥
मुमुक्षुभिरनात्मज्ञैः सैव माया विनिन्द्यते ।
आत्मज्ञैस्तैश्च सैव स्यात्पूजिता च परासये ॥ ८ ॥

यथामायास्वरूपं हि प्रकृतिस्त्रिविधा भवेत् ।
सा देवी चेति कल्याणी सरूपा चेति नामतः ॥ ९ ॥

भवेन्माया कृतो बद्धो नियतो ह्यधिकारिणाम् ।
ब्रह्मणश्च ततः सर्वं बद्धं भवति नान्यथा ॥ १० ॥

आत्मज्ञा मायया बद्धा ह्यात्मशक्तिस्वभावया ।
अनात्मज्ञास्तथैव स्युर्बद्धाः प्रकृतिभावया ॥ ११ ॥

आत्मज्ञास्ते स्वतन्त्राः स्युः शक्ताश्चाखिलकर्मसु ।
परतन्त्रास्त्वनात्मज्ञा ह्यशक्ताः सर्वकर्मसु ॥ १२ ॥

या माया ह्यात्मशक्तिः स्यादिति बुद्धिः परा भवेत् ।
सैव प्राकृतशक्तिः स्यादिति बुद्धिर्निषिध्यते ॥ १३ ॥

अत्र श्रीवासुदेवेन त्रिगुणात्मिकया तया ।
तज्ज्ञानकर्मकर्तॄणां व्यवसायोऽभिवर्णितः ॥ १४ ॥

सत्वं रजस्तम इति गुणाः सन्ति च मायिकाः ।
तद्गुणानां समुत्कर्षः साम्राज्यं च फलं तथा ॥ १५ ॥

कार्यं च साम्यवैषम्ये यथासंसारमेव हि ।
व्याख्यातानि यथातत्वं वासुदेवेन योगिना ॥ १६ ॥

तस्मान्मायां ब्रह्मशक्तिं माशब्दार्थां मुमुक्षवः ।
विज्ञाय परया भक्त्या यान्ति ब्रह्मसनातनम् ॥ १७ ॥ ”



इति । अत्र हि प्रतिपादितानां च कारिकाणामर्थविशेषाश्च मुमुक्षुवेद्याः सह मायागीतार्थैः समन्वयेन हंसयोगिना गीताभाष्यखण्डरहस्ये सप्रमाणं व्याख्याता भवन्ति । ग्रन्थविस्तरभयान्न तेऽत्र प्रपञ्चिताः सन्ति । अत एव च प्रबन्धकृता “संसारे हि क्रमश्चायमात्मशक्त्या गृह्यते । लुप्यते चायमकार उकारे, लुप्तश्च बद्धस्तत्स्वरूपे तत्स्वरूपेणैव भासते” इत्यत्र प्रतिपादितम् । अत्र च पूर्ववाक्येन, आत्मशक्त्यैव तदुपक्रमोपसंहाररूपश्च संसारक्रमो विज्ञायत इत्युक्तं भवति । आत्मशक्तिश्च ब्रह्मशक्त्यनन्या इति तु शुद्धदर्शनसिद्धान्तः । आत्मनः संसारे लुप्यमानत्वं च—विना च स्वशक्तिस्वरूपविज्ञानं मोहेन च प्रकृतिशक्त्यैव गुणानां तन्मूलसंसाराणां तत्क्रमाणां च समुद्भवः, इति विज्ञानेन प्रकृतिस्वरूपसंसाररूपेण विद्यमानत्वम्, तथा बद्धत्वम्, तदविज्ञानमूलाऽशुद्धोपक्रमस्वरूपसंसारपरत्वं चेति विज्ञेयम् ।

जगत्यस्मिंश्च भवति नानाविधनामरूपगुणदोषादिविशिष्टपदार्थभेदश्चात्मसंसारयोगेनैव । अवगम्यते ह्यात्मसंसारयोश्च विशेष्यविशेषणत्वम् । ततो विशेष्यविशेषणाभ्यां संभवति संसारश्चतुर्विधः । तच्चोक्तं भवति कारणगीतायां च शुद्धदर्शनसिद्धायां षष्ठेऽध्याये——

“ यावत्सञ्जायते किञ्चित्सत्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञयोर्योगात्तद्विद्धि भरतर्षभ ॥ ”

यथामायास्वरूपं हि प्रकृतिस्त्रिविधा भवेत् ।
सा देवी चेति कल्याणी सरूपा चेति नामतः ॥ ९ ॥

भवेन्माया कुतो बद्धो नियतो ह्यधिकारिणाम् ।
ब्रह्मणश्च ततः सर्वं बद्धं भवति नान्यथा ॥ १० ॥

आत्मज्ञा मायया बद्धा ह्यात्मशक्तिस्वभावया ।
अनात्मज्ञास्तयैव स्युर्बद्धाः प्रकृतिभावया ॥ ११ ॥

आत्मज्ञास्ते स्वतन्त्राः स्युः शक्ताश्चाखिलकर्मसु ।
परतन्त्रास्त्वनात्मज्ञा ह्यशक्ताः सर्वकर्मसु ॥ १२ ॥

या माया ह्यात्मशक्तिः स्यादिति बुद्धिः परा भवेत् ।
सैव प्राकृतशक्तिः स्यादिति बुद्धिर्निषिध्यते ॥ १३ ॥

अत्र श्रीवासुदेवेन त्रिगुणात्मिकया तया ।
तज्ज्ञानकर्मकर्तृणां व्यवसायोऽभिवर्णितः ॥ १४ ॥

सत्वं रजस्तम इति गुणाः सन्ति च मायिकाः ।
तद्गुणानां समुत्कर्षः साम्राज्यं च फलं तथा ॥ १५ ॥

कार्यं च साम्यवैषम्ये यथासंसारमेव हि ।
व्याख्यातानि यथातत्वं वासुदेवेन योगिना ॥ १६ ॥

तस्मान्मायां ब्रह्मशक्तिं माशब्दार्थां मुमुक्षवः ।
विज्ञाय परया भक्त्या यान्ति ब्रह्मसनातनम् ॥ १७ ॥"



इति । अत्र हि प्रतिपादितानां च कारिकाणामर्थविशेषाश्च मुमुक्षुवेद्याः सह मायागीतार्थैः समन्वयेन हंसयोगिना गीताभाष्यखण्डरहस्ये सप्रमाणं व्याख्याता भवन्ति । ग्रन्थविस्तरभयान्न तेऽत्र प्रपञ्चिताः सन्ति । अत एव च प्रबन्धकृता "संसारे हि क्रमश्चायमात्मशक्त्या गृह्यते । लुप्यते चायमकार उकारे, लुप्तश्च बद्धस्तत्स्वरूपे तत्स्वरूपेणैव भासते" इत्यत्र प्रतिपादितम् । अत्र च पूर्ववाक्येन, आत्मशक्त्यैव तदुपक्रमोपसंहाररूपश्च संसारक्रमो विज्ञायत इत्युक्तं भवति । आत्मशक्तिश्च ब्रह्मशक्त्यनन्या इति तु शुद्धदर्शनसिद्धान्तः । आत्मनः संसारे लुप्यमानत्वं च—विना च स्वशक्तिस्वरूपविज्ञानं मोहेन च प्रकृतिशक्त्यैव गुणानां तन्मूलसंसाराणां तत्क्रमाणां च समुद्भवः, इति विज्ञानेन प्रकृतिस्वरूपसंसाररूपेण विद्यमानत्वम्, तथा बद्धत्वम्, तदविज्ञानमूलाऽशुद्धोपक्रमस्वरूपसंसारपरत्वं चेति विज्ञेयम् ।

जगत्यस्मिंश्च भवति नानाविधनामरूपगुणदोषादिविशिष्टपदार्थभेदश्चात्मसंसारयोगेनैव । अवगम्यते ह्यात्मसंसारयोश्च विशेष्यविशेषणत्वम् । ततो विशेष्यविशेषणाभ्यां संभवति संसारश्चतुर्विधः । तच्चोक्तं भवति कारणगीतायां च शुद्धदर्शनसिद्धायां षष्ठेऽध्याये—

"यावत्सञ्जायते किञ्चित्सत्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञयोर्योगात्तद्विद्धि भरतर्षभ ॥"

इति । अत्र च क्षेत्रपदेन संसारः, क्षेत्रज्ञपदेनात्मा च कथितः ; व्यवसायपरयोस्तयोस्तथा व्यवहारस्य शास्त्रसिद्धत्वात् । अत एव प्रबन्धकृता हि महर्षिणा "अत्र चानेकवस्तुनामरूपगुणदोषभेदादिकं सर्वमुकारेण गृह्यते । विशेष्यस्य विशेषणमात्रमुकारः, विशेष्यविशेषणाभ्यां च सर्वविधोऽपि संसारः परिबुध्यते । यावदिदं जगत्, तावद्विशेष्यविशेषणस्वरूपं हि भवति" इति प्रतिपादितम् । संसारश्च—संसरत्यस्मादस्मिन्निति वेति व्युत्पत्त्या तदात्मनस्तच्छक्तेश्चापादानमधिकरणं च वा भवति । तथा चात्मकर्माधिकरणं संसार इति फलितम् । अत एव संसारेण क्रिया, इत्युच्यते । तस्माद्यच्च पुनर्महत्तत्वादिकं द्रव्यादिपदार्थजातम्, यानि पुनः पृथिव्यप्तेजोवाय्वाकाशदिक्कालसंख्यापरिमाणान्यारंभावसानविशिष्टानि, तच्च सर्वमात्माधिकरणं च कर्मपरं संसार एव भवतीति विज्ञेयम् । यथा कर्म च ज्ञानसाधनम्, तथा संसारविज्ञानं चात्मविज्ञानसाधनमस्ति । अत एवेशावास्योपनिषदि—

"विद्यां चाऽविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥"

इति, प्रतिपादितम् । अत्र चाऽविद्याबोधितेन विनश्यमानस्वभावेन संसारपरेण च पञ्चमहायज्ञादिकर्मणा, विद्यावबोधितममृतस्वरूपसंभूतिपरं चात्मविज्ञानं भवतीति कथितम् । अत एव च महर्षिणा च प्रबन्धकृता "तस्मादुकार एवाद्यन्त्यत्वविशिष्टोऽनाद्यनन्तवस्तुबोधकश्च भवति" इत्युक्तम्,



अत एव संसारस्य ब्रह्मस्वरूपसिद्धत्वेन तद्ब्रह्मसामीप्यप्राप्तिरूपसुखसाधनत्वेन तदात्मावश्यकत्वेन च सत्यत्वमवगम्यते । अस्य मिथ्येति प्रवादस्तु स्वतः कर्तृत्वाभावेन नानारूपपरिणामस्वभावत्वेन च संभवति । अतश्च महर्षिणा "अस्य मिथ्यात्वमप्यवगम्यते यस्य च भेदो विभाव्यते, नोत्पादकविनाशकविधिः, एकस्थं तदेव मिथ्येति प्रतीतेः" इति तस्य संसारस्य मिथ्यात्वमभिवर्णितम् । यस्य च भेदो नानाविधः नोत्पादकत्वं न च विनाशकत्वमेकत्र संस्थितत्वम्, तस्य मिथ्यात्वमित्यस्यार्थः । अत एव—

"संसारस्य हि नानात्वात्कर्तृत्वाभावतश्च हि ।
मिथ्यात्वं परिकल्प्येत ह्यतोऽसौ स्यादसत्स्थितिः ॥"

इति, प्रणववादार्थदीपिकायामुक्तम् । एवमन्यत्र महर्षिणा, संसारस्य ब्रह्मजिज्ञासासाधनत्वमुक्तम् । अत एव संसारे चात्मनः कर्मज्ञानभक्तिनिष्ठाश्च कथ्यन्ते । विदुषां त्वेतेषां साम्यबुद्धिरेव भवति फलं महत् । तत एव च तेषां विदुषां सुखदुःखे, शत्रुमित्रे, परापरौ चेति सर्वं सममेव भवति । अत एवोच्यते "यावदेवं न बुध्यते तावदेव ह्येते प्रतीयेते । यो हि स्वात्मवृत्त्या यदावश्यकं मन्यते, तत्सुखम् । तथानावश्यकं दुःखम् । एवं सर्वत्र वेदितव्यं भवति । अन्यथा सर्वमेवेदमात्मेति बुध्या प्रपञ्चनाशः । सर्वत्रैकैवात्मवृत्तिश्च स्यात् । अतश्चायं परमानन्दो मोक्षः, स्वर्ग-

प्राप्तिरित्याद्यनावश्यकत्यागेनोच्यते । अत एव साधवस्तत्त्वविदः संसारस्य प्रपञ्चस्य मिथ्यात्वारोपं न कुर्वन्ति । किं त्वेनमावश्यकविधिना पश्यन्ति । तेषां च प्राप्तं दृष्टं च सर्वमावश्यकं भवति" इति महर्षिणा । अत एव प्रणववादार्थदीपिकायाम्—

"आत्मावश्यकः संसारः सर्वदायं सनातनः ।
उच्चावचत्वधीर्नैव संसारे विदुषां भवेत् ॥
सर्वकर्मणां संसारे फलसाम्यमतिर्भवेत् ।
अत एव च साधूनां संसारो नित्य एव हि ॥
संसारेणात्मना चैव ब्रह्मबोधः प्रजायते ।
अत एव च संसारो नैव त्याज्यः कदा च न ॥
केवलं तत्र मिथ्यात्वज्ञानमेवेति निश्चयः ।
तस्मात्संसारविज्ञानमात्मनिश्चयसाधनम् ॥"

इति, संसारस्य ब्रह्मस्वरूपात्मविज्ञानसाधनत्वं नित्यत्वादिकं चोक्तं भवति । एवं निरालंबोपनिषदि, किं ब्रह्मेति प्रश्नस्य "महदहङ्कारपृथिव्यप्तेजोवाय्वाकाशत्वेन बृहद्रूपेणाण्डकोशेन कर्मज्ञानार्थरूपतया भासमानमद्वितीयमखिलोपाधिविनिर्मुक्तं तत्सकलशक्त्युपबृंहितमनाद्यनन्तं शुद्धं शिवं शान्तं निर्गुणमित्यादिवाच्यमनिर्वाच्यं चैतन्यं ब्रह्म" इति ब्रह्मस्वरूपमभिहितम् । अधिकारिणां च सर्वेषां कर्मज्ञानादिनिष्ठायै तु महदहङ्कारादिरूपेण ब्रह्माण्डादिरूपेण च ब्रह्मणो भासमानत्वं चात्रोक्तं भवति । तथा च लोकानुग्रहार्थं



स्वसङ्कल्पेन पारमार्थिकेन ब्रह्मैव संसारस्वरूपमस्तीति, प्रबन्धकृतो महर्षेश्चाशयः । अत एव संसारविज्ञानेन ब्रह्मविज्ञानं भवतीति, संसारस्य गुरुत्वमभिहितं भवति । एवं संसारस्य ब्रह्मस्वरूपविज्ञानसाधनत्वं च भारतार्थकारिकायाम्—

"ब्रह्मस्वरूपसिद्धत्वान्नित्यः संसार उच्यते ।
स्वस्वरूपाच्च मिथ्यात्वं तस्य श्रुतिभिरुच्यते ॥
ओं तत्सदितिनिर्देशः सत्यज्ञानादिलक्षणः ।
स्थूलं सूक्ष्मं कारणं च तुरीयमिति धीस्तथा ॥
अक्षराद्याः पञ्चभावा धर्मास्तदनुयायिनः ।
तद्ब्रह्मणि परस्मिंश्च संसारादेव भान्ति च ॥
यज्ञो दानं तपश्चैव कर्माणि विविधानि च ।
उभे विद्ये बन्धमोक्षौ लोकान्तरगतिस्तथा ॥
संसारमधिकृत्यैव विहितानि भवन्ति हि ।
तस्मात्संसारविज्ञानं परप्राप्तेश्च साधनम् ॥
ये ब्रह्मशक्तिं सर्वत्र व्याप्तां भुवनमोहिनीम् ।
तत्त्वतो न विजानन्ति ते स्युः संसारदूषकाः ॥
अलसाः सर्वकार्येषु द्वंद्वभावानुभाविताः ।
ते भवन्तीति सिद्धान्तः पुरा नारदभाषितः ॥"

इति, गोभिलाभिवर्णितं भवति । तस्माद्ब्रह्मजिज्ञासुभिरधिकारिभिः पूज्यश्च भवति संसार इति सिद्धान्तः ।

अथ महर्षिणा हि "मकारोऽयं तृतीयश्चाकारोकाराभ्यां
भिन्नस्वभावः, निषेधवचनोऽव्ययोऽर्धमात्रश्च भवति । न चाय-
मात्मनः संसारस्य तयोर्हेतोर्वा बोधको भवति । न तदधीनः
कश्चित्परिदृश्यते, नाप्ययं कस्य चिदधीनश्च भवति" इति
प्रणवावयवस्य च तृतीयस्य मकारस्य स्वरूपं व्याख्यातम् ।
अत्रेदमवधेयम्—"सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा, मिते-
रपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद"
इति, माण्डूक्यश्रुत्या माधातुप्रकृतिकस्य मशब्दस्यार्थद्वयं दृश्यते ।
तत्र मित्यर्थकत्वे तस्य त्वेवम्, तदात्मानात्मानौ चाकारोकार-
वाच्यौ मकारवाच्येन ब्रह्मस्वरूपेण मीयेते, इत्यर्थः संभवति ।
तथा च यदात्मस्वरूपमनात्मस्वरूपं च तदुभयमपि ब्रह्मस्वरूप-
मेवेत्यर्थः । अपीत्यर्थकत्वे तु तस्य, तदात्मानात्मनोश्च पृथगवस्था-
यित्वनिषेधपरो लयश्च कथितः । तथा च यद्धि ब्रह्मस्वरूपव्यति-
रिक्तं च स्वतो भासमानम्, तन्निषिध्यत इत्यर्थः । अत एव च
तत्रैव—

"मकारभावे प्राज्ञस्य मानसामन्यमुत्कटम् ।
मात्रासंप्रतिपत्तौ तु लयसामान्यमेव च ॥"

इति, प्रतिपादनान्मकारस्यार्थद्वयकल्पनं शब्दतो हि समञ्जसमेव
भवति । न च जाग्रत्स्वप्नावस्थयोः स्थूलसूक्ष्माभिमानिनोश्च विश्वतै-
जसयोर्हि तदुक्तोपनिषदा मकारार्थे सुषुप्त्यवस्थोपलक्षिते च प्राज्ञे



लयः, तेन तयोर्व्याप्तिश्च कथ्यते, आत्मानात्मनोर्लयस्तत्र व्याप्तिर्वा
मकारेणोच्यत इति वाच्यम्, उक्तार्थस्यापि तच्छ्रुतिप्रतिपाद्यत्व-
समर्थने बाधकाभावात्, मकारस्य निषेधार्थकत्वसमर्थन एव
तच्छ्रुतेरत्र प्रमाणतयोपपादितत्वाच्च । किं च प्रणवस्य द्वयोरपि
व्यष्टिसमष्टिरूपयोरवस्थयोर्भवति मकारस्यैव श्रवणम्, अकारो-
कारयोस्तु व्यष्ट्यवस्थायामेव । व्यष्ट्यवस्थासमुपहितस्य हि मकारस्य
निषेधार्थकत्वम्, समष्ट्यवस्थायान्तु भवति तस्य व्याप्त्यर्थकत्वम् ।
न चैवमवस्थाभेदेन चार्थभेदकल्पने हि किं प्रमाणमिति वाच्यम्,
समष्टिप्रणवान्तस्य मकारस्य व्याप्त्यर्थकल्पनस्यैवौचित्यात्, संपूर्वाच्च
व्याप्त्यर्थादशधातोः समष्टिशब्दस्य निष्पन्नत्वाच्च । किं च निषे-
धार्थकमकारान्तस्यैव प्रणवस्य व्यष्टिभावे, संहारप्रणवो ब्रह्म-
प्रणवोऽर्धमात्रप्रणवश्चेति, व्यवहारस्य नारदपरिव्राजकोपनिषदि
चाष्टमोपदेशे दृष्टत्वेन तदानीमेव भवति तथा व्यवहारः । समष्टि-
भावे तु तस्य "ओमिति ब्रह्म, ओमित्येकाक्षरम्" इति केवलमो-
मिति व्यवहार एव, न तु प्रणव इति दृश्यते । अत्र यदन्यदपि
वक्तव्यमस्ति तत्पश्चादुच्यते । तस्मात्प्रणववादप्रबन्धे मकारस्य
निषेधार्थकत्वं व्याप्त्यर्थकत्वं चेत्युभयमपि शास्त्रसिद्धमेवेति विज्ञे-
यम् । न च प्रबन्धकृता हि महर्षिणा मकारस्य "मकारो निषे-
धवचनः" इति निषेधार्थकत्वमेवोक्तमिति वाच्यम्, "प्रशस्त-
मप्रमेयं च मस्वरूपं तदुच्यते" इति मकारस्य महर्षिणैवाप्रमे-
यत्वस्य निरूपितत्वात् । यदप्रमेयम्, तच्च ब्रह्मस्वरूपवत्सर्वत्र

व्याप्तमिति सर्वदर्शनानां सिद्धान्तः। ततो मकारस्य तदुक्तोभयार्थकत्वं भवति महर्षिसंमतमेव।

इत्थं हि तन्मकारस्य निषेधप्रकारोऽवगम्यते—सति च योगे संसारपरेण च प्रकृतिमण्डलेन, तदात्मनः संभवति विशेषणत्वम्। सत्येवं तदात्मनो मन्तव्यत्वश्रोतव्यत्वविशेष्यत्वविज्ञेयत्वादिकम्, तथा ब्रह्मस्वरूपत्वेन सर्वोपास्यत्वं च "आत्मा वारे" इत्यादिश्रुतिसिद्धं हि न भवेत्। तथा कैवल्यार्थिनां च तदात्मोपासकानाम्, "अहमस्मि परश्चास्मि ब्रह्माऽस्मि प्रभवोऽस्म्यहम्" इत्यारभ्य "सर्वदा समरूपोऽस्मि शान्तोऽस्मि पुरुषोत्तमः" इत्यन्तया च मैत्रेय्युपनिषत्तृतीयाध्यायमन्त्रचतुर्विंशत्या तु समुपदिष्टा च निष्ठा न सिध्यति। किं च—जातोऽहं मृतोऽहं देवोऽहं मनुष्योऽहं चेत्यादिभावनाः, षडूर्मयः, कुलगोत्रजातिवर्णाश्रमादिरूपाः षड्भ्रमाश्चाऽपि संभवेरन्। तदुपास्यात्मस्वरूपं तु—

"प्रशासितारं सर्वेषामणीयांसमणोरपि।
रुक्माभं स्वसुधीगम्यं विद्यात्तं पुरुषं परम्॥"

इत्येवमेव हि प्रबन्धकृताभिर्णितम्। तस्मादात्मानात्मस्वरूपविज्ञानपूर्वकं हि, तदात्मनो ब्रह्मस्वरूपस्योपासनायाः सिद्धये, यः प्रतिबन्धको नानाविधभ्रमहेतुश्चात्मानात्मनोर्योगः; सोऽयं मकारेण निषिध्यत एव। अत एव "केवलं भेदवचनत्वमस्य न स्वतो भवति, किं तु संसारदृष्ट्या हि विज्ञायते। अस्य चास्तित्वं नास्तित्वमप्येवम्। अतस्त्वेवंभूतो मकार इति विज्ञायते। सर्वशब्दमूलभूतयोः सर्वार्थयोरकारोकारयोर्योगे सति चास्योत्पत्तिः परिदृश्यते। अतः सर्वाक्षरमूर्धन्यो मकारो भवति" इति महर्षिणोच्यते। एवमत्र "अस्ति नास्तीति च द्वाभ्यां भावाऽभावपदार्थावुच्येते। तयोः प्रकाशस्त्वकारोकाराभ्यामेव भवति। यस्य येन संबन्धः, स तद्गुणं हि परस्परं लभते। अतो भावाऽभवयोर्गुणः परस्पराधिकरणो भवति" इति च प्रबन्धकृतोच्यते। तथा चात्मन्यनात्मबुद्धिः, अनात्मन्यात्मबुद्धिश्चेत्युभयमपि तत्त्ववस्तुस्वरूपनिर्णयाय ह्यनेन मकारेण निषिध्यत इति विज्ञेयम्।



इत्थं हि पुनर्मकारार्थविज्ञानफलमुक्तं भवति प्रबन्धकृता—"एवंविधप्रतिषेधश्च भावाभावनिश्चयाय ससाधनो भवति। अतो ह्येवं निश्चित्य, सर्वमपि कार्यं चावश्यकं ज्ञात्वा, परमानन्दो भोक्तव्य इत्युपदेशः" इति। न चात्मानात्मनोर्योगस्य "यं विना न यस्योपस्थितिः, न तयोः पृथग्भावो वक्तुं शक्यः, किं तु स्वयमेक एव तिष्ठति। संसारस्त्वयमात्माधीनः, तथैवायमात्मा संसाराधीनः। तदेवं निश्चयेन न तयोः पृथग्भावः समुपपद्यते" इति महर्षिणा शाश्वतत्वेनाभ्युपगतत्वात्कथं स निषेद्धुं शक्यत इति वाच्यम्, शुद्धात्मयोगेन तदनात्मप्रकृतिमण्डलोद्भिन्नैश्च नानाविधैर्गुणैस्तत्कार्यैर्यदात्मनोऽभिभूयमानत्वम्, तदेवानेन मकारेण निषिध्यत इति तदर्थात्। अत एवेत्थमुक्तम्—

"गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥"

इति, श्रीभगवद्गीतायां शुद्धदर्शनसिद्धायां चैकादशेऽध्याये । अत्रात्मनोऽमृतत्वं च सत्यशुद्धनित्याऽपापविद्धत्वमेव । अत एव "संसारे हि क्रमश्चायमात्मशक्त्या गृह्यते" इति तृतीयतरङ्गे महर्षिणैवोच्यते । एवमात्मशक्त्यैव हि सात्विकबुद्धिमत्या, प्रवृत्तिनिवृत्ती, कार्याऽकार्ये, भयाऽभये, बन्धमोक्षौ च विज्ञायेते । किं च स्वरूपेणावस्थितयोरप्यात्मानात्मनोश्च स्वरूपं ब्रह्मदृष्ट्या त्वनेन मकारेण निषिध्यत इति तु विज्ञेयम् । अत एव महर्षिणा हि "अत एवास्याकारोकाराभ्यां च न योगः, किं तु द्वयोः प्रतिषेधस्वरूपः सत्याऽसत्ययुक्तायुक्तनिषेधकस्वरूपश्च मकारो भवति" इति मकारार्थोऽभिवर्णितः । तथा च तदात्मनः संसारस्य च या ब्रह्मस्वरूपव्यतिरिक्तत्वेन बुद्धिः, साप्यनेन मकारार्थविज्ञानेन निषिध्यत इति विज्ञेयम् । एवं ब्रह्मणि च परस्मिन्, आत्मेति तथाऽनात्मेति वा या बुद्धिः, साऽपि मकारेण निषिध्यत इति च विज्ञेयम् । अत एव "आवश्यकेन विधिना तु केवलं सर्वं विज्ञेयमेव भवति । सर्वप्रतिषेधबोध्यत्वमात्रेण ब्रह्म विज्ञेयमेव भवतीति सर्ववेदानां तद्विहितसिद्धान्तानां फलं भवति" इति, प्रबन्धेऽस्मिन्प्रतिपादितम् । तस्मादेव "अथात आदेशो नेति नेति" इति, बृहदारण्यकश्रुत्युक्तं च ब्रह्मलक्षणं सुसङ्गच्छते । किं चैवं निषेधार्थकेन मका-



रेणैव तुरीयमप्यात्मस्वरूपं ब्रह्मप्रतिनिधित्वेन सर्वसंस्थितम् "नान्तः प्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञं अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते, स आत्मा स विज्ञेयः" इति माण्डूक्यश्रुत्यभिवर्णितं व्याख्यातमस्तीति विज्ञेयम् । अत एव "न चायमात्मा प्रतियोगी, नानुयोगी, न विचार्यो नाऽविचार्यः, न निर्धार्यो नाऽनिर्धार्यः, न नियोज्यो नाऽनियोज्यः, न सर्वो नाऽसर्वः, न प्रशस्तो नाऽप्रशस्तः, न सिद्धो नाऽसिद्धः, साध्योऽसाध्यश्च नैवेत्यादिप्रतिषेधार्थो भवति" इति निषेधविज्ञानफलं च महर्षिणोक्तं भवति । एवमपि मकारार्थश्चात्र "यस्य च न पूर्वाऽपरौ, नार्थाऽनर्थौ, तन्मकारवाच्यं भवति" इति महर्षिणा प्रतिपादितो भवति । वस्तुतस्तु ब्रह्मणश्च शब्दकालाद्यतीतत्वेन न प्रवचनलभ्यत्वम् । अत एवोक्तं महर्षिणात्र प्रथमतरङ्गे—

"प्रसिद्धं न किंचिन्न चैवाऽप्रसिद्धं
न वा सर्वसिद्धं न वाऽसर्वसिद्धम् ।
समानं समानं न चैतत्प्रशस्तं
नमोऽहं नमोऽहं ह्यमोहं स्वरूपम् ॥

नकाराऽनकारं मकारस्वरूपं
न चोङ्कारमोङ्कारमोङ्काररूपम् ।

स्वयं ब्रह्म सिद्धं न तन्नेत्यतीतं
न चैवाहमेतत्स्वरूपं स्वरूपम् ॥

समात्माऽपि नैवं न चात्माऽपि नैवं
ह्यनात्मापि नैवं निषेधश्च नैवम् ।
न चैकं तथाऽनेकसिद्धं स्वरूपं
स्वयं ब्रह्मरूपं स्वयं ब्रह्मरूपम् ॥"

इत्यादिभिः, प्रणवार्थं च ब्रह्मस्वरूपं प्रकाशत इति । तस्मादोमित्येतत्तादृशप्रकारत्रयावस्थितब्रह्मस्वरूपबोधकं भवतीति सिद्धान्तः । एवमात्मानात्मनिषेधार्थपरं च प्रणवमनुसृत्यैव हि "अहमेतन्न" इति महावाक्यमस्तीति प्रबन्धकृता च महर्षिणोच्यते । अत्राकारवाच्योऽयमात्मैव तदहंपदवाच्यः, उकारवाच्यः संसारश्चैतत्पदवाच्यः, मकारवाच्यश्च निषेध इति च विज्ञेयम् ।

किं चैवं त्रयाणां यद्योगस्वरूपम्, तदेव ब्रह्मेति "सर्वं खल्विदं ब्रह्म" इति छान्दोग्यश्रुत्या समर्थितं भवति महर्षिणा— "सर्वशब्दोऽप्येतत्त्रयस्यैव वाचको भवति । यदिदमेतत्त्रितयवाच्यं तदेव सर्वं भवतीति बोध्यम् । तेनात्मा ब्रह्म, संसारश्च ब्रह्म, निषिद्धं च ब्रह्म, सर्वं च ब्रह्मेति फलितोऽर्थः" इति । समञ्जसमिदं भवति, यतश्च "यस्मिन्विज्ञाते सर्वं विज्ञातं भवति" इति श्रुतेरेवं त्रितयविज्ञानमेव सर्वविज्ञानरूपब्रह्मविज्ञानसाधनमिति स्पष्टमवगम्यते । त्रितयविज्ञानं च तदात्मविज्ञानं नानारूपक्रियात्मकसंसारविज्ञानं निषेधपराऽपरब्रह्मस्वरूपविज्ञानं चेति भवति । सर्वातीतं सर्वस्वभावोपेतं च ब्रह्म भवतीति विज्ञानमेव परं ब्रह्मविज्ञानमिति हि सिद्धान्तः । तथा चैवंरूपमेव ब्रह्मविज्ञानमस्तीति, भगवद्गीतायां शुद्धदर्शनसिद्धायां च द्वादशेऽध्याये—



"ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥"

इति, भगवतैवोदितम् । त्रितयात्मकविज्ञानमपि तदत्रैवैवं प्रतिपादितम् "भूमिरापोऽनल" इत्यादिना, "अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्" इत्यादिना च । एवम्—

"ब्रह्मणो मायिकं रूपं सत्याऽसत्यं स्थिराऽस्थिरम् ।
संसारचक्रवच्चच समं चैव परावरम् ॥

परप्रेप्सुमुमुक्षूणां विज्ञेयत्वेन संस्थितम् ।
विशिष्टप्रणवार्थं च द्वाभ्यां प्राह स योगिराट् ॥"

इति, नारदकारिकया मुमुक्षुवेद्यं च प्रणवार्थं ब्रह्मस्वरूपमभिवर्णितं भवति । अत्र विशिष्टप्रणवार्थविज्ञाने तु विशेषणप्रणवार्थविज्ञानस्य कारणत्वं च न्यायसिद्धमेव । भवति हि तदात्माऽनात्मनिषेधानां प्रत्येकं विज्ञानमेव विशेषणप्रणवार्थविज्ञानम्, विशिष्टप्रणवार्थविज्ञानं च सर्वं ब्रह्मेति रूपमेवेति विज्ञेयम् । वाक्यार्थोपस्थितिं प्रति पदार्थोपस्थितेः कारणत्वमिति हि न्यायः । एवमन्येऽपि

विशेषार्थाश्चात्र ये विशेषतया ज्ञातव्याः, ते सर्वेऽपि प्रणववादार्थदीपिकायां विज्ञेया भवन्ति ।

एवमस्मिन्प्रकरणे द्वितीयतृतीयचतुर्थतरङ्गैः क्रमशो हि तदात्माऽनात्मनिषेधाश्च तदकारोकारमकारवाच्या भवन्ति व्याख्याता महर्षिणा । अथास्मिंश्च पञ्चमे तरङ्गे "अथ चैतेषां वर्णानां त्रयाणां संयोगवियोगवृत्तिर्ज्ञातव्या भवति" इति तेषां वर्णानां संयोगवियोगपरा वृत्तिश्च व्याख्याता भवति । स्थितिरूपा च सा वृत्तिर्भवति । अस्ति च सा वृत्तिर्द्विविधा, स्वरूपपरा स्वभावपरा चेति । न पुनः स्वरूपस्वभावशब्दयोरर्थैक्यं शङ्क्यम्, विशेषविधया तु तयोरर्थभेदस्य शास्त्रसिद्धत्वात् । या च ह्यजन्या बाह्यार्थसंस्काराऽनपेक्षा स्वतः सिद्धा च, सा स्वरूपपरा भवति वृत्तिः, स्वरूपपरा वृत्तिरेव भवत्यनावश्यकपरा, तदन्या त्वावश्यकपरा चेति विज्ञेयम् । तथा च प्रकृते स्वभावपरा वृत्तिरेव संयोगपरा, स्वरूपपरा तु सा वियोगपरा चेति संयोगवियोगवृत्त्यर्थो विज्ञेयः । यस्य च पुनरात्मसंसारयोरस्ति जिज्ञासा, तेनैव हि वियोगवृत्तिर्भवति विज्ञेया । पृथक्त्वमेव हि तद्वियोगे कारणम् । तेषामेव हि भवति मुख्यं वियोगविज्ञानम्, यैश्च पुनः संयोगो विज्ञातो भवति । ततश्चावश्यकत्वे संयोगवृत्तिः, सत्यनावश्यकत्वे वियोगवृत्तिश्चेति वृत्तिद्वयं व्यवस्थितं भवति । एकस्यामेव व्यष्टयवस्थायां च, तदेवं वृत्तिद्वयकल्पनं तद्ब्रह्मस्वरूपस्वभावसिद्धत्वेन



युक्तमेवेति न तयोः परस्परं विरोधः शङ्कनीयः । इत्थं नियतेनानेन वृत्तिद्वयेन हि, तदकारोकाराणां त्रयाणां सहस्रशो हि भेदः श्रुतिसिद्धश्च भवति । यश्च परमात्मा, स स्वयमजायमानोऽपि, स्वसहजया ब्रह्मशक्त्या हि देव्या मायया बहुधा विजायते । तस्याश्च ब्रह्मशक्तेः कार्यमेव भवति वृत्तिद्वयम् । तस्मादधिकारिभिरात्माऽनात्मनिषेधार्थप्रवणैश्च वृत्तिद्वयमिदं विज्ञेयमिति महर्षेराशयः । तत एव पदार्थानां प्रत्येकमपि त्रित्वैकत्वं ब्रह्मस्वभावसिद्धं भवति । क्रमादेव हि वस्तूनामवस्था सञ्जायते, अवस्थयैव हि सत्संयोगवियोगौ भवत इति मुनेर्मतम् । अत्रेदमवधेयम्—आत्मानात्मनिषेधेषु, प्रथममकारः, ततश्चोकारः ततो मकारः, इति यथार्थं च क्रमो भवति । क्रमाच्चास्मादेव हि तेषु चावस्था समभिजायते । तदवस्थयैव तेषां संयोगवियोगौ भवतः । एवं संयोगविज्ञानं वियोगविज्ञानं चेत्युभयमपि सन्धिविज्ञानमिति ।

एवं महर्षिणा तत्संयोगवियोगावित्थमभिवर्ण्येते "यथा ज्ञान्यज्ञानी च दृश्यते, तस्मिन्पुरुषे ज्ञानाऽज्ञानभेदः । सति भ्रमनाशे ज्ञानी, असति च तस्मिन्नज्ञानी चेति । तत्र संयोगवियोगौ विज्ञेयौ" इति । किं चैतादृशभ्रमोऽपि नात्मन उपपद्यते, किं तु संसार एव । आत्मनि तु तत्सत्तामात्रं चाभ्युपगम्यते । ततश्च सर्वे पदार्थाः संयुक्ता विप्रयुक्ताश्च सन्तीति सिद्धान्तः । एवमर्थानां संयुक्तत्ववियुक्तत्वयोस्तु कारणं भवति

विवक्षैव । विवक्षा च—ईदृशव्यवसायपरोऽहमस्मि, इत्यात्मनः सङ्कल्परूपा भवति । यदा चैवमात्मनो विवक्षा संभवति, तदैवाऽनात्मना संसारेण च योगो ह्यात्मनः संजायते । इयं विवक्षा तु "तदैक्षत बहु स्यां प्रजायेयेति" इति छान्दोग्यश्रुत्या भवति व्याख्याता । तथा चात्र विवक्षा तु तद्ब्रह्मणो बहुभवनसङ्कल्परूपा भवतीति विज्ञेयम् । अत एव महर्षिणा "विवक्षा च व्यपदेशकार्याधीना भवति । अविवक्षा तु स्वाधीना भवति । वस्तुतस्तु आवश्यकेन नियमेन विवक्षाऽविवक्षा सन्धिरसन्धिश्च भवति ।" इति विवक्षायाः कारणं च संसारावश्यकत्वविज्ञानमेवेति कथितं भवति । किं च तदात्मशक्त्यैव हि योगो वियोगश्च बुध्यते, सर्वस्य ब्रह्मशक्तिस्वरूपत्वात्, तद्ब्रह्मशक्तिकार्यत्वाच्च । अत एव "अकारस्यैव हि सर्वशक्तिमत्वमुक्तं भवति । शक्तिमानित्युक्तेः, शक्त्या सह योगस्त्वावश्यको भवति । एवं नियमेन हि अकारं विना न वर्णोच्चारणमिति सिद्धान्तः ।" इति महर्षिवचनम् । अत्र हि योगस्य चात्मशक्तिकार्यत्वमुक्तं विज्ञायते । एवं वियोगोऽपि तच्छक्तिकार्य एव भवति । अतश्च प्रबन्धकृता "देव्या यया ततमिदं जगदात्मशक्त्या" इति तृतीयप्रकरणे तदात्मशक्तिस्वरूपमभिवर्णितं भवति । तस्मात्प्रणववाच्यस्य ब्रह्मणः स्वशक्त्यैव हि संयुक्तत्वं विप्रयुक्तत्वं शुद्धत्वं च स्वतः सिद्धं भवतीति शास्त्रस्यास्य सिद्धान्तः । अत एव "अहमेतन्न" इति महावाक्यार्थश्चेत्थमभिवर्णितो भवति महर्षिणा—



"नाऽहं ब्रह्मा शिवो विष्णुर्महाविष्णुर्नकारजः ।
स्वच्छन्नः सर्वतो भिन्नः सर्वसिद्धः सनातनः ॥

नाऽहं माया परा माया योगनिद्रा न शारदा ।
नाऽहं सरस्वती लक्ष्मीः पार्वती न रमाऽन्तरा ॥

अहमेकः सर्वरूपश्चैतन्नेत्यत्र संस्थितः ।"

इति । अत्र चाहंपदवाच्यस्य ह्यात्मनो यथा, प्रवृत्तत्वं निवृत्तत्वं च यथाक्रमं यथावस्थं यथावश्यकं यथाऽनावश्यकं च भवति, तथा तस्यैवात्मनः शुद्धत्वमपि भवतीति कथितम् । अत एवेत्थं ब्रह्मस्वरूपमभिवर्ण्यते हि भगवता—

"मत्तः परतरं नान्यत्किंचिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुधिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥

ये चैव सात्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥"

इति, शुद्धदर्शनभगवद्गीतायां द्वादशेऽध्याये । अत्र च क्रमशस्तदात्मनो ब्रह्मस्वरूपस्य सर्वजगद्धारकत्वं संयुक्तत्वं विप्रयुक्तत्वं शुद्धत्वं च कथितं भवति । यद्ब्रह्मस्वरूपं सन्निहितात्मस्वरूपेण भासमानं च,

तदेव पुनः परप्रेप्सुभिरधिकारिभिर्मुमुक्षुभिश्च विज्ञेयमित्येव सर्वेषां दर्शनानां सिद्धान्तः ।

अथ महर्षिरयं कालादीनां च पदार्थानां ब्रह्मदर्शनेनैवं नित्यैकत्वमुक्त्वा, तत्तत्त्वैकत्वविशिष्टं ब्रह्मैव सर्वाध्यात्मशास्त्रविषयमिति प्रतिपादयितुम् "ओङ्कारशब्देन केवलं ब्रह्म नानात्वादिरहितं सर्वाधिष्ठितं सार्वत्रिकं सार्वकालिकमित्यादि बोधः । अत एव "अथातो ब्रह्मजिज्ञासा" इति, वेदान्तदर्शनसूत्रं च प्रथमं समुपन्यस्य तस्यार्थं चेत्थं व्याख्याति—"तेन अथ अनन्तरं संसारात्मबोधान्तरम्, अतः तन्निषिद्धरूपबोधस्य दोषत्वात्, ब्रह्मजिज्ञासा त्रितयस्य चैकत्वकल्पना कर्तव्येत्यर्थ इति सिद्धान्तः । तस्माद्ब्रह्मजिज्ञासावृत्तेश्चापि सन्धिप्रकृतित्वे संसूचिते भवतः" इति । यश्चात्माऽनात्मस्वरूपविज्ञानी, तदात्मानात्मसंयोगवियोगयोस्तत्फलस्य च वेत्ता, स एव हि ब्रह्मविद्यायामधिक्रियते । यश्च तदात्माऽनात्मसंयोगवियोगयोस्तत्फलस्य च निषेधो दोषरूपः, स एवाधिकारिणां ब्रह्मविद्याविचारप्रवृत्तौ कारणं भवति । यच्चैवमात्माऽनात्मसंयोगवियोगावेशेन बहुधा विराजमानमिदं जगत्, तत्सर्वं ब्रह्मैव भवति । तद्विज्ञानमेव ब्रह्मविज्ञानम्, तदेव ब्रह्मविद्याधिकारिणां प्रयोजनमिति तु भवति महर्षेर्मतम् । ततश्च संसारविज्ञानस्य ब्रह्मविज्ञानसाधनत्वं नियतमिति पूर्वमुक्तं च सङ्गतमेव । वेदान्तदीपे च रामानुजीये तत्प्रथमसूत्रार्थश्चेत्थमभिवर्णितो भवति "सूत्रार्थस्तु 'अथातो ब्रह्मजिज्ञासा, अथेत्यानन्तर्ये, अत इति च वृत्तस्य हेतुभावे । ब्रह्मणो



जिज्ञासा, ज्ञातुमिच्छा । इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिहाभिप्रेतम् । पूर्ववृत्तादल्पास्थिरफलकेवलकर्माधिगमानन्तरम्, तत एव हेतोरनन्तस्थिरफलो ब्रह्माधिगमः कर्तव्यः" इति । अत्रापि कर्मकाण्डावगतस्य हि तदात्मानात्मसंयोगवियोगरूपस्य संसारस्य, तत्फलस्य चाल्पास्थिरस्य सुखदुःखरूपस्य दुष्टत्वमेवातः शब्देन प्रतिपादितमिति विज्ञातुं शक्यते । तत एव हि ब्रह्मकाण्डविचारप्रवृत्तौ, कर्मकाण्डस्य च पूर्वाभ्यस्तस्य तत्प्रतिपाद्यार्थस्य च, दुष्टत्वविज्ञानमेव कारणमिति च बुध्यते । तथा चास्मिन्सूत्रव्याख्याने तदाचार्याणामाशयो भवत्येकरूप इति सद्भिर्विद्वद्भिर्विज्ञातुं शक्य एव भवेत् । एवमेव शाङ्करमतावलंबिभिराचार्यैः "अत्र सूत्रेऽनुवादपरिहाराय शास्त्रे पुरुषप्रवृत्तिसिद्धये च कर्तव्येतिपदमध्याहर्तव्यम् । जिज्ञासापदेन विचारो लक्षणीयः । अथ शब्देन च साधनचतुष्टयानन्तर्याभिधानम् । साधनचतुष्टयं च, नित्याऽनित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिसंपत्तिः मुमुक्षुत्वं चेति । यद्यपि मुमुक्षायां सत्यां विचारप्रवृत्तौ न विलंबः, तथापि विवेकादीनां मुमुक्षुसाधनत्वेनोपयोगः । कर्तृत्वभोक्तृत्वादेरध्यस्तत्वमतः शब्देन सूच्यते । तेन ज्ञानेन बन्धनिवृत्तिलक्षणो मोक्षः सिध्यति । तथा च साधनचतुष्टयसंपन्नेन यतो बन्धस्याऽध्यस्तत्वम्, अतो बन्धनिवृत्तये मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्तव्यः इति सूत्रार्थः संपद्यते" इति तद्वेदान्तदर्शनप्रथमसूत्रं च व्याख्यातमस्ति । अत्र च साधनचतुष्टयविज्ञानिना-

मेव ब्रह्मपरवेदान्तविद्यायामधिकार इति तदार्याणामाशयः । ननु कर्मकाण्डार्थविज्ञानानन्तर्यमेवात्राथशब्देन कथ्यते, कर्मकाण्डे च न साधनचतुष्टयस्वरूपमभिहितमस्ति, ततः साधनचतुष्टयविज्ञानानन्तर्यं च न ब्रह्मविचारस्योपपद्यत इति चेन्न ; कर्मकाण्डार्थविचारजन्यफलं च साधनचतुष्टयविज्ञानमिति वक्तुं शक्यत्वात् । तथा हि—चतुर्षु साधनेषु पूर्वपूर्वस्य चोत्तरोत्तरकारणत्वम् । तत्र नित्याऽनित्यवस्तुविवेकरूपं च यत्प्रथमं साधनम्, तच्च पूर्वकाण्डविहितनित्यनैमित्तिककाम्यकर्मजन्यधर्मफलानित्यत्वप्रतिपत्तेश्च भवतीति साधनचतुष्टयस्य कर्मकाण्डावबोध्यत्वमभ्युपगन्तुं शक्यत इति । वस्तुतस्त्विदमत्र विज्ञेयम्—

"चत्वारो ये च वेदाः स्युः प्रत्येकं ते स्वभावतः ।
त्रिविधाः परिदृश्यन्ते वस्तुत्रयनिरीक्षणात् ॥ १ ॥
प्रथमस्तत्र भूतिं हि प्राकृतां स्तौति कर्मणा ।
आत्मभूतिं द्वितीयश्च शुद्धज्ञानेन कर्मणा ॥ २ ॥
तृतीयो ब्रह्मभूतिं च सत्यज्ञानादिलक्षणाम् ।
कर्मज्ञानभक्तियोगैस्त्यागसन्यासगामिभिः ॥ ३ ॥
प्रथमः कृष्णसंज्ञः स्याद्द्वितीयः शुक्लसंज्ञकः ।
तृतीयो ब्रह्मसंज्ञश्चेत्युच्यते शुद्धयोगिभिः ॥ ४ ॥
एवमेव भवेत्तेषां द्वैविध्यं काण्डभेदतः ।
पूर्वः काण्डो ह्युत्तरश्च काण्डः स्यादिति तद्भवेत् ॥ ५ ॥



यश्च शुक्लः कृष्ण इति वेदः पूर्वमुदाहृतः ।
पूर्वकाण्डस्वरूपश्च स भवेदिति निर्णयः ॥ ६ ॥

तृतीयो यश्च वेदः स्याद्ब्रह्मदर्शनलक्षणः ।
स चोत्तरकाण्डरूपो भवेदिति निगद्यते ॥ ७ ॥

यथाधिकारं धर्माणां समावेदनतश्च हि ।
काण्डद्वयो भवेद्वेदश्चेति वेदविदो विदुः ॥ ८ ॥

काण्डद्वयेऽप्येवमेव विषयावगतिर्भवेत् ।
यथाविषयविज्ञानं संज्ञा स्यात्काण्डयोर्द्वयोः ॥ ९ ॥

सामान्यतः पूर्वकाण्डः कर्मकाण्ड इतीर्यते ।
उत्तरो ब्रह्मकाण्डः स्यादिति वेदविदो जनाः ॥ १० ॥

स्वर्गादिलोकधर्माश्च प्राकृताः पुण्यलक्षणाः ।
नास्तिकानां कर्मिणां च कर्तव्यत्वेन चोदिताः ॥ ११ ॥

तथा तेषां कर्मिणां च ब्रह्मविज्ञानसिद्धये ।
व्याख्याता ह्यात्मधर्माश्च शुद्धैः कर्मभिरन्विताः ॥ १२ ॥

धर्मास्ते चैव सर्वेऽपि कर्मकाण्डनिरूपिताः ।
ततः कृष्णशुक्लशाखाः पूर्वकाण्डव्यवस्थिताः ॥ १३ ॥

केवलं प्राकृतो धर्मः साङ्गः कृष्णेन कथ्यते ।
आत्मधर्मश्च शुक्लेन स भवेदभिवर्णितः ॥ १४ ॥

शुक्लकृष्णशाखयोश्च ह्यन्वयेन च ये भुवि ।
जानन्ति पूर्वकाण्डार्थं ते यान्ति परमं पदम् ॥ १५ ॥

नित्याऽनित्यरूपयोश्च ह्यात्मसंसारयोरपि ।
विवेकः पूर्वकाण्डार्थविचारादभिजायते ॥ १६ ॥

ये कृष्णशाखामात्रं च पुण्यपापफलप्रदम् ।
जानन्ति कर्मगीतायां दूषितास्ते महात्मना ॥ १७ ॥

इतीशावास्योपनिषत्कुमारवचनम् । अत्र च खण्डरहस्ये हि— "यथेच्छं संचरतां च नास्तिकानामनियतकर्मणां समुद्धृतये हि कृष्णसंहिताः सन्ति महर्षिभिः प्रकाशिताः । तानपि स्वात्मस्वरूपविज्ञानपूर्वकनियतशुद्धकर्मानुष्ठापनेन परं च पदं नेतुं भगवानसौ योगिनां प्रवरश्च याज्ञवल्क्यस्तामिमां च शुद्धकर्मानुष्ठानप्रकारव्याख्यानपरां सत्यधर्मवादिनीं च शुक्लसंहितां प्रकाशयामास । सर्वेषां चाधिकारिणां नित्यानित्यवस्तुविवेकश्च शाखयोरनयोः समन्वयाध्ययनेन समभिजायते । तन्नित्याऽनित्यवस्तुविवेकादेव हि तेषामधिकारिणां च ब्रह्मविद्यायां तु कर्मज्ञानभक्तियोगरूपायां संभवत्यधिकारः । तेनैव हि क्रियमाणं च सर्वं कर्म ब्रह्मयज्ञरूपं भवति । इदमेव हि ब्रह्मविद्याधिकारप्राप्तिसाधनतमं च कर्म भवति । तदुक्तं श्रीभगवद्गीतायां शुद्धसमयसिद्धायां कर्माध्याये च द्वाविंशे—



"यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नाऽयं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥"

इति । तस्माज्जन्मशतेनाऽपि ब्रह्मविद्याधिकारमनवगच्छतामल्पाऽस्थिरफलं हिंसारूपं च यज्ञादिकर्म समाचरतां चाशुद्धकर्मपराणाम्, स्वात्मज्ञानपूर्वकनित्याऽनित्यवस्तुविवेकायैव भगवता सेयं शुक्लसंहिता च समवतारिता चकास्तीति विज्ञेयम्, इति । तस्मादिदानीं तत्त्वमेवं हि विजानतां पूर्वकाण्डाच्च द्विविधान्नित्याऽनित्यात्माऽनात्मस्वरूपविवेकरूपं च प्रथमसाधनं ब्रह्मविद्याधिकारलक्षणम्, तथा तन्नित्याऽनित्यवस्तुविवेकादेव वैराग्यं शमदमादिसंपत्तिर्मुमुक्षुत्वं चेति साधनान्तरविज्ञानं च संभवेद्ब्रह्मविद्याधिकारिणामिति, ब्रह्मविचाराधिकारस्य साधनचतुष्टयानन्तर्यवादिनामार्याणामाशयश्चेति विज्ञेयम् । एवं साधनचतुष्टयस्य ब्रह्मविद्याविचारपूर्वभावित्वं निगदतां शङ्कराद्याचार्याणामेतत्प्रबन्धकर्तुर्महर्षेश्च सिद्धान्ते त्वियानेव भेदः—ब्रह्मविद्याविचारस्य साधनचतुष्टयविज्ञानानन्तर्यनिरूपणं तूभयसंमतमेव । परं तु साधनचतुष्टयप्रकारवचनं च विजातीयार्थकं दृश्यते । यच्च वा ह्यधिकारिणां तत्त्वैकत्वनिष्ठासाधनम्, तदेव साधनचतुष्टयविज्ञानमिति तदाशयः । अत एव "एतत्त्रितयविज्ञानायैव शास्त्रमिति स्पष्टतया विभक्तमेकैकं सर्वमपि पृथक्पृथ-

रूपेण भासत इति ज्ञात्वा तत्र दोषं निरूप्य ततश्चैकत्वसमर्थननिष्ठा भवति, तदेकत्वविज्ञानायैव ब्रह्मजिज्ञासा समुपपादिता भवति'' इति, तदेकत्वसमर्थननिष्ठैव महर्षिः साधनमित्याह। यस्य हि आत्मा च संसारादन्यः, आत्मनोऽन्यश्च संसारः, आभ्यामस्ति ब्रह्म विजातीयमिति यच्च त्रिविधं ज्ञानम्, तस्यैकविज्ञानानिष्ठा च ब्रह्मदृष्ट्या समुपजायते, तस्यैव तद्ब्रह्मैकत्वविज्ञानाय ब्रह्मजिज्ञासा भवतीति महर्षिवचनाद्दृश्यते। विना चैवं तृत्वैकत्वविज्ञानं च केवलमात्माऽनात्मविवेकादिसाधनचतुष्टयम्, नानयति ब्रह्मविद्याविचाराधिकारं च तदधिकारिणम्, सर्वस्वभावोपेतात्माऽनात्मस्वरूपब्रह्मविज्ञानस्यैव ''सर्वं खल्विदं ब्रह्म'' इति रूपस्य ब्रह्मविद्याविचारसमधिगम्यत्वात्तस्य च विचारस्य तृत्वैकत्वविज्ञाननिष्ठाधिकारिकार्यत्वाच्च। साधनचतुष्टयं च ''इदमेव साधनचतुष्टयं भवति, प्रमाणसाधनम्, प्रमेयसाधनम्, संशयसाधनम्, प्रयोजनसाधनं च भवति। एवं यत्साधनं, तदेव साध्यं चेति बुध्यते। कार्यकारण कर्तृत्वाभावात्तदभेदाच्च'' इति, महर्षिणात्र प्रतिपादितम्। तदाशयश्चेत्थम्—यश्चाधिकारी ब्रह्मविचारे प्रवर्तते, तस्य प्रमाणप्रमेयसंशयप्रयोजनार्थाभिज्ञत्वं हि लक्षणं भवति। अत्र प्रमाणपदेनात्मा, संशयभूतं च सर्वं जगत्, प्रमेयस्तयोः संबन्धः प्रतिषेधश्च, त्रयाणामेषां चैकत्वविज्ञाननिष्ठा प्रयोजनं चेति भवति। एवं प्रमाणादिविज्ञानेन च, आत्मन्यनात्मबुद्धिः, अनात्मन्यात्मबुद्धिः, ब्रह्मदृष्ट्या त्वात्माऽनात्मेति भिन्नबुद्धेरभावश्चाधिकारिणां सञ्जायते।



अतश्चैवं प्रमाणादिविज्ञानं चात्मानात्मनित्याऽनित्यवस्तुविवेकरूपं भवतीति। अतश्च प्रबन्धकृदुक्तसाधनचतुष्टयप्रकारोऽपि स्वरसतः सङ्गच्छत इति विद्वद्भिश्च सद्भिर्विज्ञेयम्। न च ह्यधिकारिणां वेदपूर्वकाण्डार्थस्य यथावत्परिज्ञानेन त्रित्वैकत्वनिष्ठायाः सिद्धत्वेन न किमप्यस्ति ब्रह्मविद्याविचारसञ्जातं च प्रयोजनमिति वाच्यम्, यथावत्पूर्वकाण्डाध्ययनेन त्रित्वैकत्वनिष्ठायाः संभवेऽपि, तन्निष्ठासाध्यपरिनिष्ठितविज्ञानस्य ब्रह्मविद्याविचारमात्रजन्यत्वात्। अत एव ''यस्मिन्विज्ञाते सर्वमिदं विज्ञातं भवति'' इति श्रुतेरेकविज्ञानेनैव च ब्रह्मविज्ञानरूपेण, तदन्यसर्वविज्ञानस्य परिनिष्ठितत्वम्, अतश्च ब्रह्मविद्याविचारप्रवृत्तेः पूर्वमेवं हि सर्वेषामधिकारिणाम्—

''न रामशब्दबोधस्य मराशब्दोऽस्ति कारणम्।
न रेफश्च मकारः स्यान्मकारो न च रेफगः॥ १॥

तस्माच्च रामशब्दोऽपि विज्ञेयश्चैवमेव हि।
रामेत्यक्षरयोश्चैव द्वयोः प्रत्येकमेव हि॥ २॥

याश्चैव संप्रदृश्यन्ते प्रयत्नस्थानशक्तयः।
तासां विज्ञानमेव स्यात्प्रथमं हि ततः परम्॥ ३॥

तयोरक्षरयोश्चैव क्रमविज्ञानमुच्यते।
द्वितीयं च ततो यश्च द्वयोरक्षरयोश्च हि॥ ४॥

स्फोटब्रह्मस्वरूपं स्यादेकत्वं भेदनाशकम्।
तृतीयं तस्य विज्ञानं तुरीयं तदिदं भवेत्॥ ५॥

श्रवणं चोत्तमाद्दृद्धाद्रामशब्दार्थवस्तुनः ।
इतिहासस्य दिव्यस्येत्यथ पञ्चममेव तु ॥ ६ ॥

साक्षाद्वस्तुपरिज्ञानं भवतीति हि निश्चयः ।
पञ्चमं यच्च विज्ञानं तद्धि योगेन जायते ॥ ७ ॥

एवं हि ब्रह्मशब्देऽपि चतुरक्षरसंयुते ।
पञ्चाक्षरस्वरूपे च षण्मुखे योगिनां वर ॥ ८ ॥

यथाक्रमं त्वर्थबोधः प्रशस्तो ह्यभिजायते ।
एवमोङ्कारशब्देऽपि ह्यर्थबोधक्रमो मतः ॥ ९ ॥

प्रधानवाच्यं शब्दानां यच्च वै परिबुध्यते ।
तस्याऽवयवसंस्थानविज्ञानं प्रथमाद्भवेत् ॥ १० ॥

यश्चाऽवयवसंस्थानक्रमस्तस्य मतिर्भवेत् ।
प्रधानवस्तुनश्चैव द्वितीयादिति निर्णयः ॥ ११ ॥

मुख्यार्थाऽवयवानां च पृथक्त्वेन च या मतिः ।
सा निषिद्धा भवेद्बोधात्तृतीयादिति निर्णयः ॥ १२ ॥

मुख्यार्थगुणसंपत्तिस्तुरीयादवगम्यते ।
पञ्चमाच्चैव मुख्योऽर्थः साक्षाद्धि परिबुध्यते ॥ १३ ॥

तस्मात्प्रधानार्थबोधः शब्दानां चैव सर्वशः ।
तदङ्गाक्षरवाच्यैकविज्ञानाद्ध्यभिजायते ॥ १४ ॥



शास्त्राणां चाऽपि सर्वेषां प्रत्येकं यो महामुने ।
बोधक्रमोऽस्ति कथितः सोऽयमित्थं हि बुध्यते ॥ १५ ॥

स्थानादीनां त्रयाणां हि विज्ञानं प्रथमं च यत् ।
इत्थं हि तस्य तत्त्वं स्याद्विज्ञेयमधिकारिभिः ॥ १६ ॥

यद्वै महर्षयः सिद्धाश्चाधिष्ठाय विशेषतः ।
प्राकाशयन्ति विद्याश्च लोकानां स्वस्तये च तत् ॥ १७ ॥

स्थानं भवेदिति प्रोक्तं तच्च व्यासादिलक्षणम् ।
सत्यधर्मस्वरूपं च प्रयत्नश्चेत्थमुच्यते ॥ १८ ॥

व्यापारस्तु प्रयत्नः स्यात्कार्यार्थश्चेति सोऽत्र हि ।
तपश्चर्यादिरूपश्च स्वरोदयविधिर्भवेत् ॥ १९ ॥

विवक्षिताखिलशास्त्रार्थज्ञापकं च यथाक्षरम् ।
सामर्थ्यं यत्प्रशस्तं च तच्छक्तिरिति कथ्यते ॥ २० ॥

द्वितीयं क्रमविज्ञानं शास्त्राणामित्थमुच्यते ।
पौर्वापर्यपरिज्ञानं शास्त्राणां चेति तद्भवेत् ॥ २१ ॥

शास्त्रार्थानां हि सर्वेषां वन्धहेतुः परस्परम् ।
शास्त्रार्थबोधः पूर्णः स्यात्संवन्धे सति तादृशे ॥ २२ ॥

इदमत्र हि विज्ञेयं सर्वैश्चैवाधिकारिभिः ।
पौर्वापर्यपरिज्ञानात्तस्याश्चैव परस्परम् ॥ २३ ॥

शास्त्रार्थानां च संबन्धस्तस्मादेव भवेत्पुनः ।
एकान्वयित्वं शास्त्राणामित्येतन्न्यायसंमतम् ॥ २४ ॥

शास्त्राणां चाऽपि सर्वेषां प्रधानार्थश्च यो भवेत् ।
तस्य विज्ञानमेव स्यात्तृतीयं तत्सनातनम् ॥ २५ ॥

तत्प्रधानार्थपौष्कल्यं येन वै ह्यभिजायते ।
तस्य विज्ञानमेवस्यात्तुरीयं गुणलक्षणम् ॥ २६ ॥

शास्त्रेष्वपि च सर्वेषु प्रतिपाद्यस्य वस्तुनः ।
यच्च साक्षात्परिज्ञानं तच्च पञ्चममुच्यते ॥ २७ ॥

ततश्च सर्वशास्त्रेषु ज्ञानं यच्च हि पञ्चमम् ।
तदेव ब्रह्मविज्ञानं भवतीति हि निर्णयः ॥ २८ ॥

त्रित्वैकत्वज्ञाननिष्ठयोगिनां नियतात्मनाम् ।
भवेत्पञ्चमविज्ञानं परप्राप्तिसुसाधनम् ॥ २९ ॥

यद्यपि ब्रह्मशास्त्राच्च वेदान्तादपि तद्भवेत् ।
तथापि ब्रह्मविज्ञानं तत्र शाब्दं भवेदतः ॥ ३० ॥

दर्शनानां चतुर्णां तु विज्ञानादेव जायते ।
ब्रह्मदर्शनविज्ञानं तच्चाध्यात्ममिति श्रुतम् ॥ ३१ ॥

एतानि तानि चत्वारि दर्शनानि भवन्ति हि ।
अधिलोकं दर्शनं च तथाधिज्यौतिषं तथा ॥ ३२ ॥



अधिविद्यं ततः प्रोक्तं ततोऽधिप्रजमेव च ।
इति नाम्ना हि विषयः सर्वत्र परिबुध्यते ॥ ३३ ॥

पञ्चमं दर्शनं यच्च तदध्यात्मं प्रकीर्त्यते ।
ततोऽधिलोकादिशास्त्रविज्ञानात्पर एव हि ॥ ३४ ॥

ब्रह्मविद्याधिकारश्च प्रशस्त इति कथ्यते ।
त्रैविध्यं चापि शास्त्राणां तेषां गौणं तथैव हि ॥ ३५ ॥

एकत्वमपि वेद्यं स्यान्निस्त्रैगुण्यादिलक्षणम् ।
ततः शास्त्रेषु सर्वेषु त्रित्वैकत्वं सनातनम् ॥ ३६ ॥

नानास्वभावयुक्तं च भवतीति मुमुक्षुभिः ।
ब्रह्मजिज्ञासुभिश्चैव विज्ञेयमिति निर्णयः ॥ ३७ ॥

एवं हि सर्वशास्त्राणां विज्ञाता दासवर्गगः ।
ब्रह्मविद्याधिकारी च भवेत्संसारतत्परः" ॥ ३८ ॥

इति, सनातनधर्मदीपिकायां नारदराहुसंवादे भवति ब्रह्मविद्याधिकारप्रकारः, तद्बोधक्रमश्च प्रतिपादितः । तथा च यच्च संसारात्मनो ब्रह्मस्वरूपस्य विज्ञानं तत्संसारस्वरूपनिर्णायकं च तदधिलोकादिदर्शनाध्ययनजन्यम् , तस्मादेव तदध्यात्मशास्त्रविषयब्रह्मस्वरूपजिज्ञासा च भवतीति महर्षेर्मतमिति विज्ञायते । न च तदुक्तप्रमाणवचनैश्च सर्वेषामपि शास्त्राणां तृत्वैकत्वविज्ञानस्यैव प्रतिपाद्यविषयविज्ञानप्रयोजनत्वेन कथनात्तत्तृत्वैकत्वविज्ञानस्याऽध्यात्मशास्त्राध्ययनप्रयोजनत्वेन प्रतिपादनमसङ्गतमिति वाच्यम् , तत्त्रित्वै-

कत्वविज्ञानस्य च तदध्यात्मशास्त्रेतरशास्त्राध्ययनप्रयोजनत्वाभावात्। अत्रेदमवधेयम्—यथावदधिकारिणां सामान्यतो विद्याध्ययनेन सत्यपि शास्त्राणां त्रित्वैकत्वविज्ञाने, तत्कथं संभवतीति विचार्यम्। यदधिलोकादिशास्त्रचतुष्टयम्, तेन च शास्त्राणां तेषां त्रित्वमवगतमस्ति। यच्च पञ्चममध्यात्मशास्त्रम्, तेन तेषामेकत्वं च ब्रह्मस्वरूपस्वभावसिद्धमवगम्यते। परं तु या हि तृत्वैकत्वसमर्थननिष्ठा, सा ब्रह्मस्वरूपजिज्ञासाकारणमिति विवेक इति। तथा चैवं निष्ठया हि ब्रह्मशास्त्रविचारात्सर्वस्य तृत्वैकत्वविशिष्टब्रह्मस्वरूपत्वविज्ञानं संभवत्यधिकारिणामिति विज्ञेयम्।

एवमन्येष्वप्यध्यात्मशास्त्रेषु योऽयं योगश्चित्तवृत्तिनिरोधकश्च प्रोक्तः, सोऽपि त्रयाणां चैकत्वप्रवचनपरो भवति। तदुक्तम् "अथ योगानुशासनम्, योगश्चित्तवृत्तिनिरोधः" इति सूत्रद्वयं भवति पातञ्जले योगशास्त्रे। अत्र चित्तवृत्तिश्च चित्तव्यापारः। भवति चित्तं च सङ्कल्पात्मकम्। मानसं कर्म च सङ्कल्प इति प्रसिद्धेः, प्रोक्तो व्यापारश्च कर्मरूपो भवतीति विज्ञायते। अस्ति च सर्वेषां कर्म स्वरूपानुरूपम्। पदार्थानां विभागश्च तत्कर्मणैव हि दृश्यते। सति च विभागे पदार्थबहुत्वम्। तच्च हि निर्दिश्यते विचारात्त्रिविधमिति। तदेवं त्रिविधानां च भावानां निरोधश्चैकीकरणरूपः प्रसिद्धो भवति। यश्च हि तादृशो निरोधः, स एव योगो भवति सन्धिरूपः। ततो योगश्च सर्वेषां भवत्येकत्वविज्ञान-



रूप इति बुध्यते। इत्थं किल भवति विज्ञेयस्तत्सूत्रद्वयार्थः— तत्तच्छास्त्रप्रतिपाद्यविषयाणां च सर्वेषां पदार्थानां त्रित्वं विज्ञाय हि तत्त्रित्वैकत्वनिर्णायको योगश्च समधिगम्य इति। ननु "वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः" "प्रमाणविपर्ययविकल्पनिद्रास्मृतयः" इति पातञ्जलसूत्रद्वयात्, प्रमाणादीनां च पञ्चानां व्याख्यानरूपाश्च "प्रत्यक्षानुमानागमाः प्रमाणानि" विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः "अभावप्रत्ययालंबना वृत्तिर्निद्रा" अनुभूतविषयाऽसंप्रमोषः स्मृतिः" इति तत्पातञ्जलसूत्रपञ्चकात्तद्भाष्याच्च वृत्तिशब्दस्य गुणार्थकत्वप्रतिपादनाद्व्यापारार्थकत्वमनुपपन्नमिति चेत्, न; एवं पञ्चधा ह्यभिवर्णितानां च वृत्तीनां व्यापारजन्यत्वस्य विचारतः समवबुद्धत्वात्। यथा——इन्द्रियार्थसन्निकर्षजन्यं हि प्रत्यक्षम्। अत्र सन्निकर्षश्च व्यापारः, तस्मिन्निन्द्रियजन्यत्वस्य तदिन्द्रियजन्यज्ञानजनकत्वस्य च सत्वात्। एवं सर्वत्र विज्ञेयमिति। अत एव "चित्तस्य निर्मलसत्त्वपरिणामरूपस्य या वृत्तयोऽङ्गाङ्गिभावपरिणामरूपास्तासां निरोधो बहिर्मुखपरिणतिविच्छेदादन्तर्मुखतया प्रतिलोमपरिणामेन स्वकारणे लयो योग इत्याख्यायते" इति भोजेन, योगश्चित्तवृत्तिनिरोधः इति द्वितीयसूत्रं व्याख्यातम्। इदं च सर्वमभिप्रेत्येत्थं प्रोक्तं महर्षिणा "यच्चित्तवृत्तिनिरोधकरणं योगसंज्ञकं व्यवस्थितम्, तदप्येतद्रूपेण बोध्यम्। वृत्तिश्च व्यापारः। तेन व्यापारस्य पृथग्रूपत्वात्तन्निरोधकरणोपदेशः। यदिदं त्रितयं संसारात्मप्रतिषिद्धं

पृथग्भासते, तस्य चैकीकरणयोगश्चिन्त्यतामिति तदर्थः" इति। किं चात्र "जिज्ञासया हि ज्ञानं भवति, तदेव योगः" इति योगशब्दस्य ज्ञानार्थकत्वमपि भवति महर्ष्यभिवर्णितम्। तस्माद्ध्यात्मविद्यास्वरूपयोगशास्त्राध्ययनस्याऽपि त्रित्वैकत्वविज्ञानमेव परमं प्रयोजनं भवतीति महर्षेराशयो विज्ञायते।

एवमध्यात्मस्वरूपसांख्यशास्त्राध्ययनादपि तदधिकारिणां संभवति प्रयोजनं च त्रित्वैकत्वविज्ञानमेव। तथा हि—तेषां दर्शने च भवन्ति चतुर्विंशतितत्त्वानि, तत्र च तत्त्वाष्टकानां प्रकृतिपरत्वम्, षोडशानां चापरेषां तेषां विकृत्यात्मकत्वम्, अव्यक्तस्य च प्रथमतत्त्वस्य सर्वजगत्कारणत्वं चेत्यादि सर्वं महाभारतशान्तिपर्व ३११. अध्यायवचनेनोक्तम्। यथा—

"सांख्यज्ञानं प्रवक्ष्यामि परिसंख्यानदर्शनम्।
अव्यक्तमाहुः प्रकृतिं परां प्रकृतिवादिनः॥
तस्मान्महत्समुत्पन्नं द्वितीयं राजसत्तम।
अहङ्कारस्तु महतस्तृतीयादिति नः श्रुतम्॥
पञ्चभूतान्यहङ्कारादाहुः सांख्यनिदर्शिनः।
एताः प्रकृतयश्चाष्टौ विकाराश्चापि षोडश॥
पञ्चैव विशेषा वै तथा पञ्चेन्द्रियाणि च।
एतावदेव तत्त्वानां सांख्या आहुर्मनीषिणः॥"

इति। एवमेव च तेषां तत्वानां हि तदनुलोमेन क्रमेण प्रवृत्तिः,



प्रतिलोमेन पुनस्तेन निवृत्तिः, अन्तरात्मनश्च सर्वोपरतावेकत्वं प्रवृत्तौ बहुत्वं च तत्रैवोक्तम्। यथा—

"यस्माद्यदभिजायेत तत्तत्रैव प्रलीयते।
अनुलोमेन जायन्ते लीयन्ते प्रतिलोमतः॥
अधिष्ठाता य इत्युक्तस्तस्याप्येतन्निदर्शनम्।
एकत्वं च बहुत्वं च प्रकृतेरनुतत्त्ववान्॥
एकत्वं प्रलये चास्य बहुत्वं च प्रवर्तनात्।
बहुधाऽऽत्मानमकरोत्प्रकृतिः प्रसवात्मिका॥"

इति। एवं चतुर्विंशतितत्त्वात्मिकायाश्च प्रकृतेर्गौणं त्रित्वं च सांख्यसिद्धमित्थम्—

"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।
अजोऽप्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥"

इति, श्वेताश्वतरोपनिषदि ४ अध्याये प्रतिपादितम्। एवं महाभारते च शान्तिपर्वणि ३११—अध्याये गुणानुरूपत्रिविधव्यवसायपरत्वमात्मनः प्रतिपादितम्। यथा—

"सम्यङ्निदर्शनं नाम प्रत्यक्षं प्रकृतेस्तथा।
गुणतत्त्वाद्यथैतानि निर्गुणोऽन्यस्तथा भवेत्॥"

इति। अत एवात्र महर्षिणा "या हि संख्यात्र दृश्यते, सा न पृथग्रूपा, किं तु त्रितयत्वमेवेति सांख्यम्" इत्युक्तम्। अत्रायं

भावः—यच्च तत्त्वमपरं परं च, तदियदिति ज्ञानं येन जायते तत्सांख्यमिति सांख्यशब्दार्थोऽभिवर्णितो भवति सनातनधर्मदीपिकायां नारदराहुसंवादे । यथा—

"आत्मीयं प्राकृतं यच्च ताभ्यां यच्च परं मतम् ।
सनातनं ब्रह्मतत्त्वं सर्वश्रुतिविभाषितम् ॥

सम्यग्विचार्यते येन यथाभेदानुदर्शनम् ।
तदियत्तदियच्चेति तच्च सांख्यमिहोच्यते ॥

अव्यक्तादीनां तत्त्वानां चतुर्विंशतिसंख्यया ।
तदुपक्रमदृष्ट्या च सत्त्वमित्यत्र निर्णयः ॥

तदुपसंहारदृष्ट्या पुनश्चाव्यक्तसंज्ञिके ।
सर्वेषां प्राकृतानां च तत्त्वानां हि समन्वयः ॥

यश्च सोऽयं द्वितीयः स्यान्निर्णयोऽत्र प्रकीर्तितः ।
एवमव्यक्ततत्त्वस्य परस्मादात्मनश्च हि ॥

तदुपक्रमदृष्ट्या च सत्त्वमित्यपि निर्णयः ।
तदुपसंहारदृष्ट्या तच्चात्मनि विलीयते ॥

सोऽयमात्माऽपि पुरुषे प्रपञ्चोपशमात्मके ।
विलीनो दृश्यते चैवं पुरुषः शुद्धमण्डले ॥

तन्मण्डलं ब्रह्मसंज्ञमिति वेद्यं मुमुक्षुभिः ।
इत्यस्मिन्दर्शने सांख्ये निर्णयः शुद्धसंमतः ॥



आब्रह्म मानुषान्तं च स्थानं कर्मगुणावृतम् ।
त्रिभिः स्वभावैर्युक्तं च राजते मुनिसत्तम ॥

इत्यपि ब्रह्मभावैश्च कृतोऽस्त्यत्र हि निर्णयः ।
सनातनमिदं शास्त्रमस्ति विज्ञानसाधनम् ॥

यच्च सांख्यं हि विज्ञानं महाकैवल्यसाधनम् ।
तच्च वै ज्ञानगीतायां भवेत्समभिवर्णितम् ॥

तैश्चोच्यते च कर्तृत्वं प्रकृतेरिति यच्छ्रुतेः ।
तच्चाप्यात्मशक्तिमायापरं स्यादिति निर्णयः ॥

इत्थं च सर्वतत्त्वानां प्राकृतानां महामते ।
त्रिभिर्गुणैः शक्तिजैश्च भवेद्भेदः सहस्रशः ॥

सति योगे त्वात्मना च तेषां भावस्तथा भवेत् ।
अधिकृत्य च तं मूढास्त्वनात्मज्ञा विचेतसः ॥

ब्रह्मणः सूत्रशक्तिं च न्यक्कुर्वन्त्यवैदिका जनाः ।
कर्मभिर्भेदमूलैश्च जातिद्वेषोपजीविभिः ॥

तस्मात्सांख्ये च शास्त्रेऽस्मिन्त्रित्वैकत्वं सनातनम् ।
विचारपूर्वकं प्रोक्तं तत्त्वानां मुनिपुङ्गव ॥

सांख्ये च निहितं ज्ञानं परमं तत्त्वलक्षणम् ।
एवमन्यच्च विज्ञेयं सर्वं चास्ति मुमुक्षुभिः ॥

तत एव महाविद्या सांख्यविद्या प्रशस्यते ।
अध्येया स्यादियं दासैर्लोककैङ्कर्यतत्परैः ॥"

इति । तस्मात्सर्वेषां पदार्थानां त्रितयत्वं विज्ञेयमिति । एवं ब्रह्म-तत्त्वस्य सांख्यसमयसिद्धस्य नानात्वैकत्वयुक्तत्वं च महाभारत-शान्तिपर्वणि ३१० अध्याये प्रपञ्चितम् । यथा—

"परस्परेणैतदुक्तं क्षराऽक्षरनिदर्शनम् ।
एकत्वमक्षरं प्राहुर्नानात्वं क्षरमुच्यते ॥
पञ्चविंशतिनिष्ठोऽयं यदा सम्यक्प्रचक्षते ।
एकत्वं दर्शनं चास्य नानात्वं चाप्यदर्शनम् ॥
तत्त्वनिस्तत्त्वयोरेतत्पृथगेव निदर्शनम् ।
पञ्चविंशतितत्त्वं तु तत्त्वमाहुर्मनीषिणः ॥
निस्तत्त्वं पञ्चविंशस्य परमाहुर्निदर्शनम् ।
वर्गस्यवर्गमाचारं तत्त्वं तत्त्वात्सनातनम् ॥"

इति । तस्मात्साङ्ख्यदर्शनमप्येतन्नित्वैकत्वविशिष्टब्रह्मस्वरूपविज्ञान-साधनं भवतीति सिद्धान्तः । अत एव हि महर्षिणा "सङ्ख्यायाः पदार्थमात्रकारणत्वम्, तस्य परमार्थत्वम्, आवश्यकत्वं च संसूचितं भवति" इत्युक्तम् । तत एव हि साङ्ख्यदर्शनस्य च परिपूर्णब्रह्मविज्ञानजनकत्वं परमार्थदत्वं सनातनत्वं शुद्धत्वं समस्त-दर्शनधारकत्वं भगवन्नारायणानुग्रहीतत्वं च महाभारतशान्तिपर्वणि ३०७ अध्याये प्रतिपादितं यथा—



"साङ्ख्यं विशालं परमं पुराणं
महार्णवं विमलमुदाहरन्ति ।
कृत्स्नं च साङ्ख्यं नृपते महात्मा
नारायणो धारयतेऽप्रमेयम् ॥"

इति । एवं तत्रैव साङ्ख्यदर्शनस्य महिमा विशेषतो ह्यभिवर्णिता भवतीत्यलं विस्तरेण ।

अथैवं महर्षिश्च "एवमेव कर्मत्रितयं मीमांसकानामित्यपि ज्ञेयम् । कर्तव्याकर्तव्ये, तयोः संबन्धश्चान्य इति त्रितयं बोध्यम्, कर्तव्याऽकर्तव्ययोः, ताभ्यां भिन्नस्य च ममत्वविशिष्टत्वात् । अत एव स्वार्थपरार्थपरमार्थाभिधानं भवति" इति मीमांसक-दर्शनस्य कर्मत्रयविधायकत्वमाह । मीमांसकदर्शने तु विहित-निषिद्धत्वेन तदिष्टानिष्टफलसाधनत्वेन च कर्मद्वैविध्यं प्रधानतो हि दृश्यते । प्रणवशास्त्रार्थसमन्वयेन तु तदस्य मीमांसादर्शनस्य कर्मत्रयविधायकत्वं युक्तमेवेति महर्षेराशयः । सदृष्टान्तं च कर्म-त्रिविधमपि महर्षिणैव प्रतिपादितम् । यच्च हि तृतीयं कर्म, तच्च सर्वमावश्यकमिति बुध्या क्रियमाणमित्युक्तम् । तच्च हि कर्मत्रैविध्यं श्रीभगवद्गीतायां शुद्धदर्शनसिद्धायां चतुर्विंशेऽध्याये—

"ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥"

इति, प्रतिपादितं भवति । अत्रचोदना च "चोदनालक्षणोऽर्थो

धर्मः" इति पूर्वमीमांसादर्शने १-१-२ सूत्रप्रतिपादिता भवति। सा च विधायकवाक्यमित्यर्थः। तथा च त्रिभिश्च विधिवाक्यैः कर्म विहितमिति प्रतीयते चेति विज्ञेयम्। तृतीयपरमार्थकर्मपराश्च तत्त्वदर्शिनो भाव्यमेवेति सर्वमामनन्ति। तादृशानां स्वभावश्च कर्मगीतायां च शुद्धदर्शनसिद्धायां श्रीभगवद्गीतायाम्—

"निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्॥"

इत्यभिवर्णितो" भवति। अत एव महर्षिश्चात्र "अत एव तत्त्वदर्शिनो नानु शोचन्ति। भाव्यमेवेति सर्वमामनन्ति। न तेषु स्वपरान्यभाव इति प्रमाणैर्निश्चीयते। तदिदं कर्मपराणां प्रवचनम्—

"अकारः स्वार्थकं कर्म चोकारस्तु परार्थकम्।
परमार्थं मकारस्तु ज्ञाप्यमानमिदं जगत्॥"

इत्यादिभिः सप्रमाणं परमार्थकर्मपरानभिवर्णयति। तस्मान्मीमांसादर्शनमपि तादृशत्रित्वैकत्वविशिष्टब्रह्मस्वरूपनिर्णायकं भवति तादृशैः कर्मभिरिति सिद्धम्।

एवं वैशेषिकदर्शनेऽपि पदार्थानां च द्रव्यगुणकर्मसामान्यविशेषसमवायादीनां सप्तानां त्रित्वम्, पुनस्तेषामेकत्वं च युक्तमेवेत्युच्यते हि महर्षिणा। तत्प्रकाराश्च सर्वेऽपि सप्रमाणं विशेषतोह्यभिवर्णिता भवन्ति। ततश्च वेदान्तादिभिरङ्गशास्त्रैः षड्भिस्त्रित्वैकत्वविशिष्टब्रह्मैव बोध्यं भवतीति निश्चीयते। तथा चास्मिन्प्रकृ-



तिसन्धिप्रकरणे तरङ्गपञ्चकात्मके सर्वाधिकारिभिश्च विज्ञेयमात्मस्वरूपम्, संसारस्वरूपम्, तदुभयभिन्नं तदुभयात्मकं निषेधपरं च समाहारवाच्यं ब्रह्मस्वरूपम्, तदेतत्त्रयाणामेकत्वं च व्याख्यातं भवति महर्षिणेति विज्ञेयम्। तस्मादेवं महर्षिप्रतिपादितानां चार्थानां शास्त्रान्तराऽविरुद्धत्वेन, मुमुक्षुजनवेद्योऽर्थश्च सर्वोऽपि विशेषतो निरूपितोऽस्तीति सर्वं समञ्जसम्।

**इति प्रणववादार्थविमर्शे**
**॥ द्वितीयगुच्छः ॥**

---

आर्या महाभागाः?

अद्य हि विमर्शप्रबन्धश्च प्रणववादस्य प्रथमप्रकृतिसन्धिप्रकरणान्त एव प्रकाशितः। सोऽयं हि यावान्किश्चत इति प्रतिज्ञातः, तावानद्य कार्यान्तरव्यग्रतया न प्रकाशितः इत्यपराधस्य भाजनममुं जनं च सन्तोऽनुगृह्णन्त्विति सविनयं संप्रार्थ्यते। संपूर्णश्च विमर्शप्रबन्धस्तृतीयभागेन प्रणववादस्य भविष्यति। भगवत्कृपया हि सर्वमविघ्नमस्तु।

किं च—श्रीमत्परमहंसपरिव्राजकाचार्यत्वाद्यनेकबिरुदाङ्कितजगद्गुरुश्रीमच्छङ्कराचार्यप्रभासपत्तनशारदापीठाधीश्वरश्रीमत्त्रिविक्रमतीर्थस्वामिभिः, मण्डलस्यास्य महोदयं प्रति, श्रीमद्भ्यः सर्यस्-सुब्रह्मण्यार्येभ्यः सानुग्रहं संप्रेषितं श्रीमुखं च ससपर्यं स्वीकृत्य तत्पूज्यपादत्रिविक्रमतीर्थेभ्यः साकं हि तत्सुब्रह्मण्यार्यैः सकार्तज्ञं प्रणामसहस्रं समर्पयामः। तदिदं श्रीमुखं च शुद्धधर्ममण्डलप्रबन्धानां तत्प्रकाशकस्य च श्रेयसे पुरस्तादस्य प्रबन्धस्य समर्पितं विराजते।

इत्थं प्रकाशकः
**पण्डित के. टि. श्रीनिवासाचार्यः**